नं० ५९२० — घ

तन्त्रसारः

पत्राणि १८७

(सम्पूर्ण)

तन्त्रसारः (सम्पूर्णः)
पत्राणि १-८७

तं
सार
१

ॐ श्रीगणेशाय नमः

ॐ अथ तन्त्रसारप्रारम्भः ॐ नत्वा कृष्णपदद्वन्द्वं ब्रह्मा-
दिसुरवंदितं गुरुञ्च ज्ञानदातारं कृष्णानन्देन धीमता
तत्तद्ग्रन्थगतान्वाक्यान्नानार्थप्रतिपादकान् सौकार्या-
र्थं सर्वेषां तन्त्रसारः प्रतन्यते उच्यते प्रथमं तत्र लक्ष-
णं गुरुशिष्ययोः अथ गुरुलक्षणं शान्तो दान्तः कुलीनश्च
विनीतः शुद्धवेशवान् शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः
सुबुद्धिमान् आश्रमी ध्याननिष्ठश्च तन्त्रमन्त्रविशारदः नि-
ग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते आगमसंहितायां
उक्तञ्चैव सारदायां मातृतः पितृतः शुद्धः शुद्धभावो जि-
तेन्द्रियः सर्वागमानां सारज्ञः सर्वशास्त्रार्थतत्त्ववित्
परोपकारनिरतो जपपूजादितत्परः अमोघवचनः शा-
न्तो वेदवेदाङ्गपारगः योगमार्गानुसंधायी देवताहृ-
दयङ्गमः इत्यादिगुणसंपन्नो गुरुरागमसम्मतः विश्व-
सारतन्त्रेऽपि सर्वशास्त्रपरो दक्षः सर्वशास्त्रार्थवित्सदा सु-
वचाः सुन्दरः स्वङ्गः कुलीनः शुभदर्शनः जितेन्द्रियः स-
त्यवादी ब्राह्मणः शान्तमानसः संहर्तुं समर्थो ब्राह्मणो-
त्तमः तपस्वी सत्यवादी च गृहस्थो गुरुरुच्यते इति गुरु-
लक्षणं ज्ञानार्णवे गुरौ मानुषबुद्धिं च मन्त्रे चाक्षरबुद्धि-
कं प्रतिमासु शिलाबुद्धिं कुर्वाणो नरकं व्रजेत् जन्महे-
तू हि पितरौ पूजनीयौ प्रयत्नतः गुरुर्विशेषतः पूज्यो
धर्माधर्मप्रदर्शकः गुरुः पिता गुरुर्माता गुरुर्देवो गुरु-
र्गतिः शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन गुरोर्हितं

प्रकर्त्तव्यं वाङ्मनःकायकर्म्मभिः अहिताचारतादेवि वि
ष्टायां जायते क्रमिः शरीरदः पिता देवि ज्ञानदो गुरुरेव च
गुरोर्गुरुकृतघ्नो नास्ति संसारे दुःखसागरे यस्य वक्त्राद्विनि
र्गतं वर्णं हृत्तमयं वचः तारयेन्नास्ति संसारे दुःखसाग
रे यस्य वक्त्राद्विनिर्गतं वर्णं हृत्तमयं वचः तारयेत् स दे
हो नरकार्णवतो ध्रुवं मन्त्रत्यागाद्भवेन्मृत्युर्गुरुत्यागाद्द
रिद्रताः गुरुमन्त्रपरित्यागाद्रौरवं नरकं व्रजेत् गुरोः संनि
हिते यस्तु पूजयेदन्यदेवता स याति नरके घोरं सा पूजा
विफला भवेत् श्रीक्रमे उत्पादकब्रह्मदात्रोर्गरीयान्ब्र
ह्मदः पिता तस्मान्मन्येत सततं पितुरप्यधिकं गुरुं गु
रुवद्गुरुपुत्रेषु गुरुवत्तत्सुतादिषु गुरुवत्पूजनं का
र्यं तेनाप्नेवाकवालने गुरुवद्भजनं कार्यं सर्वदा गुरु
संनतो निगमकल्पद्रुमे अविद्यो वा सविद्यो वा गुरुरेव च
दैवतं अमार्गस्थोपि मार्गस्थो गुरुरेव सदा गतिः आयान्
तमग्रतो गच्छेद्गच्छन्तमनुव्रजेत् आसने शयने वा
पि न तिष्ठेदग्रतो गुरोः अनुज्ञातमप्यनितिष्ठेन्नैव शापमवा
प्नुयात् तथा क्रियासारे गुरुर्म्माता पिता स्वामी बान्धवः सु
हृदः शिवः इत्याधाय मनो नित्यं भजेत्सर्वात्मना गुरुं कि
ञ्चासारसमनुबोध्य पित्रोश्चैव गलत्कुष्ठी नेत्ररोगी च वामनः
कुनखः श्यावदन्तश्च स्त्रीजितोऽधिकाङ्गकः हीनाङ्गः कपटी
रोगी च बह्वाशी च कृत्यलापकः पैत्रे दोषे विवृत्तो यः स गुरुः शि
ष्यसम्मतः यामले अभिशप्तमपुत्रञ्च कदर्यं कितवं तथा

क्रियाहीनं शठं चापि वामनं गुरुनिंदकं मलरक्तविकारा
ढ्य वर्जयेन्मतिमान्सदा सदा मत्सरसंयुक्तं गुरुं तंत्रेन वर्ज्ज
येत् वैशंपायनसंहितायां अपुत्रोमस्तनपुत्रश्च कुष्ठी च
वामनस्तथा इत्यादयपि वोध्यमिति शान्तो विनीतः शुद्धा
त्मा श्रद्धावान् धारणक्षमः समर्थश्च कुलीनश्च प्राज्ञः स
च्चरितो यतिः एवमादिगुणैर्युक्तः शिष्यो भवति नान्यथा
श्रमश्च शुश्रूषवान्धार्म्मिकः शुद्धो गुरुभक्तो जितेन्द्रियः शि
ष्यो योग्यो भवेत्सोहि दानध्यानपरायणः निषिद्धशिष्य
लक्षणमाह पापिने क्रूरचेष्टाय शठाय कृपणाय च दी
नाय चाचारशून्याय मंत्रद्वेषपराय च निन्दकाय च मूर्खाय
तीर्थद्वेषपराय च गुरुभक्तिविहीनाय न देयां मलिना
य च पितृमातृहितेयुक्तः सर्वकर्मपरायणः आश्रमी
देशवासी च गुरुरेवं विधीयते मत्स्यसूक्ते मध्यदेश
समुद्भूतः शान्तः सर्वगुणैर्युतः श्वेतदोरश्च संपन्नो गुरुरा
गमसम्मतः रुद्रयामले आदौ साधकदेवश्च संपन्नो गुरु
रागुदाचारमतिः सदा पशुभावरतो वीरः सायाह्नदीव
भाववान् एतेषां भाववर्गाणां गुरुर्वेदान्तपारगः शान्तो
दान्तः कुलीनश्च विनीतः शुद्धवेशवान् शुद्धाचारः सुप्र
तिष्ठः शुचिर्दक्षः सुबुद्धिमान् आश्रमी ध्याननिष्ठश्च मंत्र
तंत्रविशारदः निग्रहानुग्रहे शक्तो वशी मंत्रार्थजापकः
हरुनीलनतेपि वहिरिन्द्रियहर्ता च गुरुः सर्वत्र दुर्लभः
अन्तरिन्द्रियहर्ता च गुरुः सर्वत्र शोभनः आचारवान्महा

विद्याराधननिष्णश्चतत्परः नकुलाचारसंयुक्तोगुरुरि
त्यभिधीयते कामान्तत्रेऽपि शान्तोदान्तःकुलीनश्चशु
द्धान्तःकरणमलस्तथा पञ्चतत्वात्मकोयस्सद्गुरुःसम
कीर्तितः सिद्धोसावितिविख्यातोबन्धुभिःशिष्यपालकः
चमत्कारीदेवशाकासद्गुरुःकथितःप्रिये श्रुतसंभ
तेवक्तिवाक्यसाधुमनोहरं तंत्रमंत्रसमावेशियपवस
द्गुरुःस्मृतः महानिर्वाणतंत्रे शाक्तेशाक्तोगुरुःशान्तः
शैवेशैवोगुरुस्मृतः वैष्णवेवैष्णवःसौरेसौरोगुरुस
माहृता गाणपेगाणपःख्यातःकौलःसर्वत्रसद्गुरुःय
तःसर्वात्मनाधीमान्कौलादीक्षांसमाचरेत् तथापशो
र्वैष्णवःस्वकमंत्रःपशुरेवनसंशयः वीरात्सकमंत्रवीरः
कौलाच्चब्रह्मविद्भवेत् रुद्रयामलतंत्रेऽपि शैवोऽपिपरवि
द्यानामुपदेष्टानसंशयः वैष्णवःस्वमतस्थानांसौरःसौर
विदांमतो गाणपत्यस्तदेवीनांगाणपानांमोत्साप्रवर्तकः शैवशा
क्तेवसर्वत्रदीक्षाक्षामीनसंशयः कौलस्तस्मात्स्वजन्त्वेनकु
लीनेगुरुमाश्रयेत् इतिकुलीनगुरुप्रसंशा पतस्मिन्मा
त्भवेशाखेव्यक्ताथपदहाहिते कूटेनार्थकल्पयन्तःपति
तायांस्यधोगति रुद्रजमले नीरोगीनिरहंकारोविकार
रहितोमहान् तपस्वीसत्यवादीचसदाध्यानपरायणः
आगमार्थविशिष्टज्ञोनिजधर्मपरायणः श्रव्यकलिङ्ग
विहीनस्याभावकोभद्रदानवान् लक्ष्मीमान्यतिमान्नाध्या
त्गुरुरित्यभिधीयते गुर्वागमार्थेनतवाकत्रसंधानाद्धो

तं॰ सा॰रे॰ ३

धनादपि रुद्रादिदेवधनाद्गुरुरित्यभिधीयते श्रीमो
क्षानन्दात्स्वात्मानन्दस्वलाभबोधनात् सकितत्त्वानवि
हत्वात् श्रीनाथः कथितः प्रिये स्वयमावर्तते शिष्याना
वाविश्यापयत्यपि आचिनोति हि शास्त्रार्थानाचार्यस्तेन
कथ्यते चराचरसमस्तत्रमध्यापयति यः स्वयं यमादि
योगसिद्धत्वादाचार्य इति कथ्यते सारसंग्रहे विशुद्धमा
तापितृको जितेन्द्रियः सर्वागमज्ञः परतत्त्वविकामरः मथा
थर्ववेदविद्वेदपारगः शान्तः कुलीनो गुरुरीरितो द्विजः
नवचक्रेश्वरे प्रिये देसमादाय भवपाशनिकृन्तये सि
द्धान्तसारवेत्ताहसिद्धान्तसारभेदकः श्रीचिच्छिन्नात्मन
श्च सदानुग्रहनिग्रहे शिवो दिव्याकृतिर्देवि नवरूपो
चरोच्यते तथा श्रीगुरुपरशिष्यान्शास्यामि पार्वति
परमे निजननैपरानन्दसमुद्भवम् तत्त्वविद्विते य
न स गुरुः कुलनायिके भूतभव्यमितत्त्वेशाभवेद्व
तिर्यः सदा वेदसः षड्विधं देवि स गुरुः कुलनायिके
वर्णकलापदं तत्त्वमंत्रभुवनमेव च बोधयेद्यः षड्
ध्वाने स गुरुः कुलनायिके षडाधारं नवद्वारं षोड
शाधारनिर्णयं यो जानाति विधानेन स गुरुः कुरुः कुल
नायिके नाडीग्रामसमुद्भिन्नपद्मतदतीतकं यो वेत्ति
पिण्डकं देवि स गुरुः कुलनायिके सत्मोहते त्वेपि षट्
तत्त्वेशो हंसश्वासं विलसद्व्योमपद्मकं स्वदेहे यो विजा
नाति स गुरुः कथितो बुधैः नवचक्रेश्वरे पिण्डपदे तथा

यंयातीतं चतुष्टये योवा सम्यग्विजानाति स गुरुः परि
कीर्तितः पिंडादिचतुष्टये यथा गुरुगीतायां पिंडं कुं
डलिनीशक्तिः पदं हंसः प्रकीर्तितः रूपं बिंदुरिति ज्ञेयं रूपा
तीतं निरञ्जनं नववक्त्रेश्वरे योवा परां च पश्यंतीं मध्यमा
मपि वैखरीं चतुष्टये विजानाति स गुरुः परिकीर्तितः
इति गुरुविशेषलक्षणं रुद्रयामले उत्तरखण्डे गुरुमू
लं जगत्सर्वं गुरुमूलं परं तपः गुरोः प्रसादमात्रेण मोक्ष
माप्नोति सद्बुधी मुण्डमालातंत्रे गुरुरेकः शिवः साक्षा
द्गुरुः सर्वार्थसाधकः गुरुरेव परं तत्त्वं सर्वं गुरुमयं ज
गत् विना गुरुप्रसादेन कोटिपुरश्चरणेन किं पिच्छिला
तंत्रे गुरुमूलमिदं शास्त्रं नान्यः शिवात्परः प्रभुः अत एव
महेशानि प्रयत्नेनो गुरुमाश्रयेत् इति गुरुमाहात्म्यम्
रुद्रयामले गुरुं विना यस्तु मूढः पुस्तकादि विलोकनात्
जपं च समाप्नोति विद्धि परमेश्वरी न माता न पिता भ्राता
न स्यात्कोपि गतिः प्रिये गुरुरेको वरारोहे पापं नाशयति
क्षणात् गुरुं विना यतस्तेन नाधिकारः कथञ्चन अतए
व प्रयत्नेन गुरुः कर्त्तव्य उत्तमः इत्यादिशास्त्रेण गुरोरा
वश्यके यामले गुरुरेकः शिवः प्रोक्तः सोहं देवि न सं
शयः गुरुत्वमपि देवेशि मंत्रोपि गुरुरुच्यते अनयोश्च
गुरौ देवे न हि भेदः प्रजायते कदाचित्सहस्रारे पद्ममध्ये
यो गुरुः सदा कदाचिद् हृदयाम्भोजे कदाचिद्दृष्टिगोचरे
मुण्डमालातंत्रे देवता गुरुमंत्राणामैक्यं संभावयन् धिया

तं
मा रं
ध

नदासिद्धोभवेन्मंत्रः प्रकटेहानिरेवच पार्वत्युवाच ए
कास्नानेमहादेवकथमुत्पद्यतेप्रभो नराकृतिगुरुंममे
देवताध्यानरूपिनी मंत्रस्याक्षररूपोहिकथमेकंभवेच्छि
व शिवउवाच एकजातिस्वरूपेनस्वभावादेकजन्मनः
एतेषांभाववयोगात्एकसाधनमेवहि गुरोर्ज्ञानस्यमंत्र
स्यमंत्रस्याज्ञानात्देवता अतएवंरागोहिदेवतायाः पिताम
हः पितृस्वभावनाद्विवर्णेवचपितुः पितुः तद्भवलो
यमेतिविपरीतेविपर्ययः यद्वामातृकाभेद तंत्रे श्रीदेव्यु
वाच नराकृतिगुरुनाथमंत्रवर्णात्मकं तथा ध्यानात्मरू
पिनेदेवमेकंत्ववाकथंवद श्रीशिवउवाच गुरुरेकम
हामंत्रोलभ्यतेसाधकोत्तमैः यद्देवान्नायनेवीजस्तस्यशु
क्तिर्भवेद्ध्रुवं देवतायाः शरीरेहिवीजाद्दुत्पद्यते प्रिये गुरो
राज्ञानुसारेणचाद्यमूर्तिस्तुजायते गुर्वादिभावनादेवि
भावसिद्धिः प्रजायते अतएवमहेशानिविवेकंत्वपरिकल्प्य
ते शुण्डमालातंत्रे मंत्रेवागुरुदेवेवानभेदयस्तकल्पते
तस्यनष्टानगाद्गात्री किंत्रदयाद्दिनेदिने इतिमंत्रदेवता
नामैक्यकथनं गुरुतंत्रे गुरुःकर्तागुरुर्हर्तागुरुःपाता
महीतले गुरुसंतोषमात्रेनतुष्टास्युःसर्वदेवताः गुरोस्तु
ष्टेशिवस्तुष्टोरुष्टेरुष्टस्त्रिलोचनः गुरोस्तुष्टेशिवस्तुष्टारु
ष्टेरुष्टाचसुन्दरी अतोगुरुर्महेशानिसंसारार्णवलंघने
कर्णधारस्तथावगुरुर्मोक्षप्रदायकः इतिगुरुतुष्टादि
फलं श्यामानन्दतरङ्गिणी ध्रुतरुद्रयामले गकारःसिद्धि

रः प्रोक्तो रेफः पापस्य दाहकः उकारः शम्भुरित्युक्तस्त्रितया
त्मा गुरुः स्मृतः कङ्कालमालिनीतन्त्रे निर्गुणं च परं तत्त्वगुरु
रित्यक्षरद्वयं महामन्त्रं महादेवि गोपनीयं परात्परं गुरुत
न्त्रे गुरुरित्यक्षरं यस्य जिह्वाग्रे देवि वर्तते तस्य किं विद्यते
मोक्षपाठे देवस्य किं तथा गकारोच्चारमात्रेण ब्रह्महत्या
व्यपोहति उकारोच्चारमात्रेण मुच्यते जन्मपातकात् रेफो
च्चारणमात्रेण उकारोच्चारणात्मनः विसर्गोच्चारणात्को
टिजन्मजं पातकं हरेत् गुरुरित्यक्षरं देवि जपतो मम भ
क्तितं ब्रह्महत्यायुतान्मुक्तोऽस्य मेतन्न संशयः परस्त्रीगा
मी मातृवधाद्देवेन्द्रो ब्रह्मविस्मरणात् पातकादपि मुक्तो
भूद्गुरोरुच्चारमात्रतः इति गुरुशब्दोच्चारणफलम्
तत्रैव ब्रह्मा रुद्रश्च विष्णुश्च पार्वती परमेश्वरी इन्द्राद
यस्तथा देवा यक्षाद्याः पितृदेवताः गंगाद्याः सरितास
र्वा गन्धर्वाः सर्पजातयः स्थावरा जङ्गमाश्चापि पर्वताः सा
र्वभौतिकाः एते वास्यवतिष्ठन्ति नित्यं गुरुकलेवरे श्री
गुरोस्तु स्मृतिमात्रेण तत्सिद्धिर्भावनायते इति गुरोरूपे जग
त्प्रसिद्धिकथनम् तत्रैव न गुरोरधिकं शास्त्रं न गुरोरधिकं
तपः न गुरोरधिको मन्त्रो न गुरोरधिकं फलं न गुरोर
धिका देवी न गुरोरधिकः शिवः न गुरोरधिका मूर्तिर्न
गुरोरधिको जपः विश्वसारतन्त्रे गुरोर्मूर्तिः सदा ध्येया
गुरोर्नाम सदा जपेत् काशीक्षेत्रनिवासः स्याज्जाह्नवी च
रणोदकं गुरुर्विश्वेश्वरः साक्षात् तारकं ब्रह्म निश्चितं

तं०
सा०
५

तथा ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोः पदं मंत्रमूलं गुरो
र्वाक्यं सिद्धिमूलं गुरोः कृपा तथा श्रुतिभिः पंचगैर्वापि स्मृ
तैर्वाशापितो यदि कालमृत्युभयाद्वापि गुरू रक्षति पार्व
ति गुरुसाधनतंत्रे गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्व
रः गुरुर्ज्ञानं गुरुस्तीर्थं गुरुर्दानं गुरुस्तपः गुरुरग्निर्गु
रुः सूर्यः सर्वं गुरुमयं जगत् इति सर्वस्माद्गुरोराधिक्य
कथनं किं दानेन किं तपसा किमन्यतीर्थसेवया श्रीगु
रोरङ्घ्रितोयेन पादोदेनैनाश्रितं जगत् ब्रह्माण्डभाण्डमध्ये
तथा नितीर्थानि संति वै गुरोः पादतलेतानि निवसंति
हि सन्ततं इति गुरुपूजने जगत्पूजनसिद्धिकथनम्
पिच्छिलातंत्रे गुरुस्तु द्विविधः प्रोक्तो दीक्षाशिक्षाप्रभेदतः
श्रादौ दीक्षागुरुः प्रोक्तः शैवशिक्षागुरुर्मतः यस्माल्लब्धो
महामंत्रः श्रूयतेऽप्यन्यतेपि वा स गुरुः परमो ज्ञेयस्तदा
ज्ञा सिद्धिदायिनी कुलागमे प्रेरकः सूचकश्चैव वाच
को दर्शकस्तथा शिक्षको बोधकश्चैव षडेते गुरवः स्मृ
ताः पंचैते कार्यभूतास्तु कारणं बोधको भवेत् इति गु
रुभेदकथनं तथा तत्त्वेनोपदिष्टो येन तत्त्वेन सं
शयः पशुभिश्चोपदिष्टाये दारितेपशवः स्मृताः श्रुतिज्ञ
श्चाद्धरेन्मन्त्रं विनमूर्खो वा मूर्खं विमुद्धरेत् शिलां सन्तारयेल्लोह
न शिलां तारयेच्छिला अन्यच्च गुरुतंत्रे गुर्वो बहवः सं
ति शिष्यवित्तापहारकाः तमेकं दुर्लभं मन्ये शिष्यहृत्ता
पनाशकं पश्चात् शुभवेनैषां भक्तिमुक्तिप्रदायकः इति

5

तत्त्वज्ञगुरुकरणकारणम् आगमसारे अलसामलि:
ना: क्लिष्टा दाम्भिकाः कृपणास्तथा दरिद्रा रोगिणो रुष्टा
रागिणो भोगलालसाः असूयामत्सरग्रस्ताः शठाः परु
षवादिनः अन्यायोपार्जितधनाः परदाररताश्च ये वि
दुषां वैरिणश्चैव अल्पज्ञाः पण्डितमानिनः भ्रष्टाचाराश्च ये
कष्टवृत्तयः पिशुनाः खलाः बह्वाशिनः क्रूरचेष्टा दुरात्मा
नश्च निन्दिताः इत्येवमादयोऽप्यन्ये पापिष्ठाः पुरुषाधमाः
एवंभूता परित्याज्याः शिष्यत्वेनोपकल्पिताः गुरुताशि
ष्यता वापि तयोर्वत्सरवासतः तथा चोक्तं सारसंग्रहे स
द्गुरुः स्वाश्रितं शिष्यं वर्षमेकं परीक्षयेत् स्वमेतत्तत्काल
नियमः योगिनीतन्त्रे श्रीदेव्युवाच गुरुः को वा महेशान
वद मे करुणामय त्वत्तोऽप्यधिक एवायं गुरुस्त्वयात्र की
र्तितः श्रीईश्वरउवाच आदिनाथो महादेवि महाकालो
हि यः स्मृतः गुरुः स एव देवेशि सर्वमन्त्रेषु नापरः शैवे
शाक्ते वैष्णवे गाणपत्ये तथैन्दवे महाशैवे च सौरे च म
गुरुर्नात्र संशयः मन्त्रवक्ता स एव स्यात् नापरः परमेश्व
रि मन्त्रप्रदानकाले हि मानुषे गिरिनन्दिनी अधिष्ठाने
भवेत्तस्य महाकालस्य शंकरि अतो न गुरुतो देवि मानु
षे नात्र संशयः मन्त्रदाता शिवः प्रोक्तो यध्यानं कुरुते गुरोः
तध्यानं कुरुते देवि शिष्योऽपि शीर्षपंकजे तथा तं शिष्य
शिरसि चोपदिष्टं न वान्यथा इति कामाख्यातन्त्रे अत
एव महेशानि एक एव गुरुः स्मृतः अधिष्ठानवशात्

ने॰ सा॰ र॰ ८
6

स्यमानुषस्य महेश्वरी महात्म्यं कीर्त्तितं तस्य सर्वशास्त्रे
षु शंकरी कामाख्यातन्त्रे श्रुत एव महेशानि कुतो हि
मानुषो गुरुः मानुषे गुरुता देवी कल्पनानन्तमुख्येनः
मोक्षो न जायते देवि मानुषे गुरुभावनादिति तथा श्रु
त एव गुरुर्नैव मनुजः किन्तु कल्पना दीक्षादौ साधका
नां च वृत्तादौ पूजने यथा गुरुतन्त्रेपि एक एव गुरुर्देवि
सर्वत्र परिगीयते भेदस्तस्य नकेनत्यास सर्वगुरुमयो यत
त् विशेषं शृणु वक्ष्यामि महात्म्यं गुरुगोचरम् पशुमन्त्र
प्रदानेन तु मर्य्यादा दश पौरुषी वीरमन्त्रप्रदानेन तु पञ्चवि
शति पौरुषी महाविद्यासु सर्वासु पञ्चाशत् पौरुषी म
ता ब्रह्मयोगप्रदानेन तु मर्य्यादा शत पौरुषी शाक्तानन्द
तरंगिण्यां मानवस्य महेशानि संतेपां त्रिगदामिते गुरुः
परमगुरुश्चैव परापरगुरुस्तथा स्वगुरुः परमेशानि सा
क्षाद् ब्रह्म न संशयः तस्मिन्ना परमगुरुर्देवि विस्वयं विस्तुः
तिर्नो सदा तस्मिन्ना परापरगुरुर्महेश्वर समः सदा ह
रनीलतन्त्रे परापरगुरुर्नाथ निर्णयं शृणु पार्वति आदौ
सर्वत्र देवेशि मन्त्रदः परमो गुरुः परापरगुरुस्तत्व हि पर
मेष्टि तं हे गुरुः कुलार्णवतन्त्रे पारम्पर्य्यं समाम्नायं म
न्त्राचारादिकं प्रिये सर्वे गुरुमुखाल्लब्धं सफलं स्यान्नचा
न्यथा पाशच्छेदकरा देवी गुरुणा न्यपरे न जन्मतः जाति भि
क्षिप्यमाना च पारम्पर्य्या मितीरितम् ग्रन्थ श्री गुरुलक्षण
स्वमेतन्नियमो न हीनेनार नैवेव गाच्चामात्यनो

दोषः पत्नीपापं स्वभर्तरि तथा शिष्यार्जितं पापं गुरुः प्राप्नोति
निश्चितं वर्षैकेण भवेद्योग्यो विप्रो गुणसमन्वितः वर्षद्वये
न राजन्यो वैश्यस्तु वत्सरैस्त्रिभिः चतुर्भिर्वत्सरैः शूद्रः कथि
ता शिष्ययोग्यता ताराप्रदीपे आगमोक्तविधानेन कलौ
देवान् यजेत्सुधीः नहि देवाः प्रसीदन्ति कलौ चान्यविधा
नतः तथा कृते श्रुत्युक्तमार्गः स्यात् त्रेतायां स्मृतिसम्भवः
द्वापरे तु पुराणोक्तः कलावागमसम्मतः अशुद्धाः शूद्रक
ल्पा नो ब्राह्मणाः कलिसम्भवाः तेषामागममार्गेण शुद्धिर्न
श्रौतवर्त्मना मन्त्राणां देवतास्तेषां देवता गुरुरूपिणी ते
षामभिदानकर्तव्या यदीक्षैव शुभमात्मनः रुद्रयामले पार्व
त्यैव सदाचारा गुरुभक्ता जितेन्द्रिया सर्वमन्त्रार्थतत्व
ज्ञा सुशीला पूजने रता सर्वलक्षणसम्पन्ना रूपिकापद्म
लोचना रत्नालङ्कारसंयुक्ता सर्वाभरणभूषिता शान्ताकु
लीना कुलजा चन्द्रास्या सर्ववृद्धिदा अनन्तगुणसंपन्ना रु
द्रत्वदायिनी प्रिया गुरुरूपा शक्तिशक्तिदात्री शिवज्ञान
विरूपिणी गुरुयोग्या भवेत्सा हि विधवापरिवर्जिता
स्त्रियो दीक्षा शुभा मातुश्चाष्टगुणा स्मृता पुत्रिणी विधवा या
स्या केवलानन्दकारिणी सिद्धमन्त्रं यदि तदा गृह्णीयाद्विय
वा सुतात् केवलं सफलं तन्त्र मातरष्टगुणं स्मृतं स्वयं
वा स्वप्नविलये ददाति यदि सन्मतं तत्राष्टगुणमाप्नोति य
दि मा पुत्रिणी सती यदि मा स्वीयमन्त्रं ददाति तत्तु ज्ञायव
तदाष्टसिद्धिमाप्नोति भक्तिमार्गेण संशयः तदेवतुर्लभं

नं॰
सा॰रं॰
१

देवयदिमात्राप्रदीयते श्रादौभक्तिंततोमुक्तिंसंप्राप्यका
मरूपधृक सहस्रकोटिविद्यार्थंजानातिनात्रसंशयः स
मेवायदिवामानाददातिवस्त्रमेवकं पुनर्दीक्षांसोपिहत्वा
दानवत्वमवाप्नुयात् यदिमायवशेनैवजननीछात्रवर्त्ति
नी तदासिद्धिमवाप्नोतितत्वमत्रंविचारयेत् स्वीयमन्त्रोपदे
शेनतुनकुर्याद्गुरुचिन्तनं इतिश्रीगुरुकथनम् गुरोक
नैवोवर्जनीयमाह रुद्रजामले वर्जयेत्तुपरानन्दरहिते
रूपवर्जिते निन्दितेरोगिनंक्रूरंमहापातकिनंगुरुं अष्ट
प्रप्रकारकुष्ठेचकलत्रकुष्ठीनमेवच श्वित्रिनेजनहिंसा
र्थंसदार्थनाहितेनतथा स्वर्णविद्रासनंचौरंबुद्धिहीनंमृएव
वैरं शपावदन्तंकुलाचाररहितशान्तिवर्जिते सकलंकं
नेत्ररोगपीडितेपरदारगं असंस्कारप्रवक्तारंस्त्रीनेवाधिका
रूकं कपटध्यानमेवश्चविशिष्टंवक्रजल्पकं बहुभाषिने
हिकुपनेमिथ्यावादिनमेवच अशान्तेभावहीनश्चपञ्चा
चारविवर्जितम् दोषजालैःपूजितान्नूःपूजयेन्नगुरूंविना
देव्यागमेशिववाक्यम् गुरुशय्यासनंयानंपादुकोपान
त्पीठकं स्नानोदकंतथाछायांलंघनेनैवकारयेत् गुरो
रग्रेपृथक्पूजामौद्धत्यञ्चविवर्जयेत् दीक्षांव्याख्यांप्रभु
त्वञ्चगुरोरग्रेपरित्यजेत् रुद्रजामले ऋणदानंतथादानं
वस्तूनांक्रयविक्रयं नकुर्याद्गुरुणासार्द्धंशिष्योभू
त्वाकदाचन गुरुशब्दार्थमाह तन्त्रार्णवे गकारःसिद्धि
दःप्रोक्तोरेफःपापस्यदाहकः उकारःशम्भुरित्युक्तस्त्रित

यात्मा गुरुः परः गकाराज्ज्ञानसम्पन्नो रेफः पापस्य दा
हकः उकाराच्छिवतादात्म्यं दद्यादिति गुरुः स्मृतः गुशब्द
स्त्वन्धकारः स्याद्रुशब्दस्तन्निरोधकः अन्धकारनिरोधित्वा
द्गुरुरित्यभिधीयते कुलचूडामणौ निरुत्तरतन्त्रे पशु
शावस्य पूर्णस्य तुम्बकस्य विशेषतः धर्मार्थकाममोक्षार्थी
गुरुत्वेन न वर्णयेत् यामले गुरोर्विचारः सर्वत्र ज्ञातमा
तामहं विना प्रमादाद्वा यदा तत्त्वं दीक्षाविधिमुपाचरेत्
प्रायश्चित्तं ततः कृत्वा पुनर्दीक्षां समाचरेत् सावित्रीमन्त्र
जापश्च लक्षसंख्यो जगत्पते विलोमेनाप्रणवं लक्षं प्रायश्चि
त्तमिति स्मृतं अशक्तश्चेन्महादेवी वा पुनः प्रजपेन्मन्त्रं दश
साहस्रजप्येन सर्वकिल्बिषनाशिनी गायत्री छन्दसां मा
ता पापराशितूलानलः कठिनश्चरित्रश्चैव प्रमादं चैव दीक्षा
विधिमुपाचरेत् अन्यथा तद्विरोधेन कायनाशो भवेद्ध्रुवं
सिद्धमन्त्रश्च यत्नेन यायाद्दुष्कुलादपि भैरवि स्वमेतन्नियमो
नास्ति दीक्षास्य गुरुशिष्ययोः स्वमलस्त्रियादते संस्कारेण
विशुध्यति महाकपिलपञ्चरात्रे नातिबालो न वृद्धश्च न
खञ्जो न कृशो न लम्बा नाधिकाङ्गो न हीनाङ्गो न खल्वाटो न
दन्तुरः कल्पचिन्तामणौ क्षयरोगी चण्डश्च धर्माकुनखी श्या
वदन्तकः कर्णोद्धः कुसमाख्यश्च खल्वाटः खञ्जरीटकः
कर्णाद्धो वधिरः खञ्जरीटः खञ्जः अङ्गहीनोतिरिक्ताङ्गः पि
ङ्गाक्षः भूतिनासिकः ह्रस्वाङ्गो वामनः कुब्जः श्वित्री चैव नपुं
सकः एकजिनासिकोऽङ्गहिनासिकः इत्याद्यैर्देहजैर्दोषैः

गं·
सो· २·
८

संयुक्तोनिन्दितोगुरुः संस्काररहितोमूर्खोवेदशास्त्रविव
र्जितः श्रौतस्मार्त्तक्रियाभ्रष्टः स्तुकभाषः स्वकुत्सितः पुत्रया
जनजीवीचनरोवैद्यस्त्वकामुकः क्रूरोदम्भीमत्सरीव्यस
नीकृपणःखलः उदासीनोमुदासितोवनस्थोवनवासि
नः यतीनाञ्चयतिःप्रोक्तोगृहस्थानांगुरुर्गृही वैष्णवैर्वै
ष्णवोग्राह्यः शैवैःशैवस्तथापुनः भक्तिकेचितयेविद्यादी
नास्वामीनसंशयः गुरुरपिगृहस्थःपञ्चकुलार्णवे सर्व
शास्त्रार्थवेत्तावगृहस्थोगुरुरुच्यते तथाचकल्पे कलत्र
पुत्रवान्विप्रोदयालुःसर्वसम्मतः देवपित्रर्षिमित्रेचगृह
स्थोदेशिकोभवेत् कुलवृद्धमतो पितृमातृतथाभ्रातृ
वोमातुलस्तथा येनोपदिष्टस्तन्त्रेस्मिन्नतेगुरुंसमुपाश्र
येत् नचवालान्नवृद्धश्चनविज्ञोनकृशस्तथा इतिस्त्रय
प्यधीत् कुसङ्गीनास्तिकोभीतोमहापातककिल्बिनः देवा
निगुरुविद्यादिपूजाविधिपराङ्मुखः संध्यातर्पणपूजादि
मन्त्रस्नानविवर्जितः आलस्योपहतेभाती धर्म्महीनउपश्रु
तः इत्याद्यैवहुभिर्दोषैरागमोक्तैश्चयत्नतः वर्जनीयोगुरुः
प्रोक्तोरीतास्तथ्यापनादिषु मन्त्रस्तके अपुत्रस्यापतनपत्नी
कःशक्तिहीनोथवामनः कुब्जःकुष्ठःश्यावदन्तोनृपबलीप
तिरेवच मातामहस्यानुजस्यसोदरस्यतथैवच पितृधर्म
द्वेनगन्ध्रायातथ्यांचैवाश्रितस्यच कदाचिदप्यदिगन्धादिषु
नःसंस्कारमर्हति स्यान्यगुरुमाह कामाख्योतन्त्रे मानुषे
गुरुतत्त्वस्यकल्पनामात्रमुत्कायथाभोकेतुभोजं क्रिस्तनोदि

पात्रकेन च दीपनेच तथा देवी तस्मै सर्वसमर्पणं यदिनिं
यच्च तस्मात्रेस्वर्णेवापि कुलेश्वरी तदात्यजेत्तं तस्मात्रेश्रन्यपा
त्रेणभोजयेत् अतोहि मनुजेल्लब्ध्वा शिष्योहि संत्यजेत्
सर्वेषां भुवने सत्यं ज्ञानाय गुरुरेव हि ज्ञानान्मोक्षमवाप्नो
ति तस्माज्ज्ञानं परात्परम् अतो यो ज्ञानदाने हि नक्षमेतं त्य
जेद्गुरुं अत्र काङ्क्षी निरन्तं हि यथा मेत्वजति षियेत् ज्ञाने
न त्रसमाभाति सद्गुरुः शिवएव हि अज्ञानिनं वर्जयित्वा
शार्णेज्ञानिनं व्रजेत् मधुलुब्धो यथा भृङ्गः पुष्पात्पुष्पान्तरं व्र
जेत् ज्ञानलुब्धस्तथा शिष्यो गुरोर्गुर्वन्तरं व्रजेत् तथा पूर्वोक्त
दोषयुक्तस्य दीक्षा वावीरयव वा तयोरपि न कर्तव्या शिष्येण
गुरुभावेन किन्तु कार्यं हि तेषि त्वं गुरुताकल्पनं सृजेत्
कौलानाज्ञानं नैव महाविद्यासम्प्रदायवीराचारं ददाति न स
याति नरकं घोरं शिष्योपि पतितो भवेत् पशुभावो स्थितो यो
हि कालिकातारिणीमन्त्रं दत्वाचारं ददेन्नैव नरकान्न निवर्तते
तस्मात्सद्गुरुरत्याज्यः साधकैः सर्वदा प्रिये यदि देवात्पशो
दीक्षां लभते शाक्तएव च कौलान्तकौलिकीकृतत्वात तस्मात्तु पुन
रालभेत् शिष्यप्रकरणमुच्यते कुलार्णवे शरीरमर्थप्राणं
च सद्गुरुभ्यो निवेदयः गुरुभ्यः शिष्यतो योगं शिष्य इत्यभि
धीयते अथ शिष्यलक्षणं तथा च निरुत्तरे गुरुं न मर्त्यं बु
ध्येत यदि बुध्येत तस्य तु न कदाचिद्भवेत्सिद्धिर्न मन्त्रैर्देवपू
जनैः तथा एकग्रामस्थितः शिष्यस्त्रिसन्ध्यं प्रणमेद्गुरुं
क्रोशमात्रस्थितो भक्त्या गुरुं प्रतिदिनं नमेत् अर्धयोजनतः शिष्यः

ने· सा·रं· ८
9

प्रणमेत्सद्गुरुं पर्वसु एकयोजनमारभ्य योजनद्वादशावधि ।
दूरदेशस्थितः शिष्यो भक्त्या तत्सन्निधिं गतः तत्र योजनसं
ख्योत्कमासेन प्रणमेद्गुरुं यदि दूरे च वार्द्धक्ये स्वगुरोर्णागा
रं भवेत् वर्षे वर्षे च कर्त्तव्यं गुरोश्चरणवन्दनं एतेन एक
धा दक्षिणायने एकधा उत्तरायणे कर्त्तव्यं रुद्रयामले ।
शिष्यलक्षणादृशो भूत्वा सद्गुरुं पर्युपासयेत् चतुर्भिर्गुणैः
संयुक्तः श्रद्धावान् सुस्थिराशयः अलुब्धः स्थिरगात्रश्च प्रेक्षा
कारी जितेन्द्रियः आस्तिको दृढभक्तिश्च गुरौ मन्त्रे च देवते
एवंविधो भवेत्शिष्यस्त्वितरो दुःखकृद्गुरोः सारदाति
लके शिष्यः कुलीनः शुद्धात्मा पुरुषार्थपरायणः अधी
तवेदः कुशलो दूरमुक्तमनोभवः हितैषी प्राणिनां नित्य
मास्तिकस्त्यक्तनास्तिकः स्वधर्मनिरतो भक्त्या पितृमातृ
हितोद्यतः वाङ्मनःकायवसुभिर्गुरुशुश्रूषणे रतः एता
दृशगुणोपेतः शिष्यो भवति नापरः समयाचारतन्त्रे शिष्यो
पि स्वगुणैर्युक्तो गुरुभक्तिरतः सदा धर्म्मकामादिसंयुक्तो गु
रुमन्त्रपरायणः सत्यबुद्धिर्गुरौ मन्त्रे देवपूजनतत्परः गुरूप
पादिष्टमार्गे च सत्यबुद्धिरुदारधीः एवंलक्षणसंयुक्तः शि
ष्यश्चापि परीक्षितः इति शिष्यलक्षणं रुद्रयामले कामुकं
कुटिलं लोकनिन्दितं सत्यवर्जितं अविनीतमसमर्थं प्रज्ञाही
नं रिपुप्रियं सदा पापक्रियायुक्तं विद्याशून्यं जडात्मकं कलि
दोषसमूहाढ्यं वेदक्रियाविवर्जितं आश्रमाचारशून्यं चाशुद्धा
नःकरणोद्यतं सदा श्रद्धाविरहितमधमं क्रोधिनं भ्रमं अ

सद्वाक्यं विगुणं परदारान्तरं तथा सर्वस्वाङ्ग-सम्भूतोऽम
सभक्तं दैन्यचेतसं नानानिन्दाहताङ्ग-चेतं शिष्यं वर्जये
द्गुरुः इति निन्द्यशिष्यलक्षणम् जामले यदि नत्यजते
वीरधनदानादिहेतुना नारकी शिष्यं समापीत हि शिष्
मवाप्नुयात् तत्क्षणादशिद्धः सम्भवेच्छासादितपातकैः अ
कस्मान्नरकं प्राप्य कार्यनाशाय केवलं विचार्य यत्नाद्धि
धवच्छिष्यसंग्रहमाचरेत् अन्यथा शिष्यदोषेण नरकस्थो
भवेद्गुरुः इति वर्जनीयशिष्यकरणनिन्दा शिष्यकर्म
व्याकरणे पित्रादिमन्त्रनिषेधमाह योगिनीतन्त्रे पितुर्म
न्त्रं न गृह्णीयात्तथा मातामहस्य च सोदरस्य कनिष्ठस्य वै
रिपक्षाश्रितस्य च तथा च गणेशविमर्शिन्यां यतेर्दीक्षा
पितुर्दीक्षा दीक्षा चैव वनवासिनः विविक्ताश्रमिणो दीक्षा न
साकल्यप्रदायिका रुद्रयामले न पत्नीं दीक्षयेद्भर्ता न पि
ता दीक्षयेत्सुतां न पुत्रं च तथा भ्राता भ्रातरं न च दीक्षयेत्
सिद्धमन्त्रो यदि पतिस्तदा पत्नीं स दीक्षयेत् शक्तित्वेन व
रारोहे न च सा पुत्रिका भवेत् इत्यादि निषेधवचनाद्देव्या
मन्त्रं न गृह्णीयात् इदन्तु सिद्धेतरविषयं सिद्धमन्त्रे न दोष
तीति वचनात् यतेरपि दीक्षाकाशक्तिजामले रुद्रजाम
ले यथा न लङ्घयेद्गुरोराज्ञां मुखं तरं न वदेत्तथा दिवारा
त्रौ गुरोराज्ञां दासवत्परिपालयेत् इति गुर्वाज्ञापालनविधिः
न शृणुयाद्गुरोर्वाक्यं शृणुयाद्वा पराङ्मुखः अहिते वा
हिते वापि रौरवं नरकं व्रजेत् आज्ञाभङ्गं गुरोर्देवस्य कारो

ने॰
सां २॰
१॰

तिसमृद्धधीः अयाति नरकं घोरं शूकरत्वमवाप्नुयात्
तथाप्येकविंशतिपटले हत्या धर्मे हत्या चार्थे हत्या दीक्षा
हत्या तपः हत्यासत्कृतिमाप्नोति गुर्वाज्ञालङ्घनात्क्षणा
इति गुर्वाज्ञालङ्घनदोषः द्वितीयपटले आज्ञाभङ्गं तथा
निन्दां गुरोरप्रियवर्णनं गुरुद्रोहञ्च यः कुर्यात् तत्संसर्गं
न न कारयेत् कुलार्णवे गुरुद्रव्याभिलाषी यो गुरुस्त्रीग
मनोत्सुकः स तिर्यग्योनिमाप्नोति क्रव्यादेभस्तनेप्रिये
न कुलार्णवे गुरुद्रव्याभिलाषी यो गुरुस्त्रीगमनोत्सुकः
स तिर्यग्योनिमाप्नोति क्रव्यादेभस्तनेप्रिये रुद्रयामले
गुरुद्रव्याभिलाषो वा गुरुस्त्रीगो भवेद्यदि पातकञ्च भवे
त्तस्य प्रायश्चित्तं न कारयेत् प्रायश्चित्तं न कारयेदिमनेन प्रा
यश्चित्तानर्हं पातकं भवेदिति सूचितं यथा कामतो ब्राह्म
णवधे निष्कृतिर्न विधीयते इति मनुवचनमप्येतदभिप्रा
यकं भविष्यपुराणे कामतो ब्राह्मणवधे यदेतन्मनुनो
दितं पतत्येकान्ततो विप्रवधवर्ज्जं नार्थमुदीरितं यामले
गुरुं त्वङ्कृत्य हुङ्कृत्य परित्यज्य निर्गम्य परिवादतः अरण्ये निर्जने देशे
स भवेद्ब्रह्मराक्षसः इति गुर्वनिष्टकरणदोषः गुरुणात्य
क्ता अशाक्ता हिंस्राः सर्वे अशाक्ता मनयस्तथा गुरुशापहता
लीनाः सर्वे यान्ति न संशयः इति गुरुशापजन्यदोषः रुद्रया
मले गुरोर्निन्दां च पैशुन्यं यः शृणोति दिने दिने तस्य तद्दिन
जं पुण्यं नश्यत्यत्र सुन्दरी इति गुरुनिन्दाश्रवणदोषः
कुलार्णवे यत्र श्रीगुरुनिन्दा स्यात् पिधाय श्रवणे स्वके स

यस्तस्माद्विनिष्क्रामेद्दूरं नम्रेण यथा तीर्थावारश्रुतो मं
त्रीज्ञानवान्सुसमाहितः निष्ठनिष्ठो यतिः ख्यातो गुरुः
स्याद्धोतिकोपि च तथा च सिद्धजामले यदि भाग्यवशेन
वसिद्धविद्यालभेत्स्त्रिये तदेवं नाउदीक्षेत तस्य का गुरुविचा
रणे तथा प्रमादाद्वा तथाज्ञानात्पितुर्दीक्षां समाचरेत्
प्रायश्चित्तेन ततः कृत्वा पुनर्दीक्षां समाचरेत् पितुरित्युलक्ष
णं तथा मातामहादीनामपि प्रायश्चित्तं तच्च पुनर्मावि
मीजपः सर्वत्रदर्शनात् शङ्खः दशसाहस्रजापेन स
र्वकल्मषनाशिनी तथा मत्स्यसूक्ते गुरोर्नाम स्मरेत्य
स्नानश्रवणे स्नामातिक्रिया इति गुरुनिन्दाश्रवणश्रुतीका
रः जामले गतश्रीश्च गतायुश्च गुरोर्निन्दाकरो नरः कल्पको
टिशतं देवि नरके पतति ध्रुवं तथा एवं श्रुत्वा महादेवि
गुरुनिन्दाकरो नियः स याति नरकं घोरं यावच्चन्द्रदिवा
करौ इति गुरुनिन्दाकरणे दोषः गुरुतत्त्वे गुरोर्मनुष्यता
बुद्धिः शिष्याणां यदि जायते नहि तस्य भवेत्सिद्धिः कल्पको
टिशतैरपि इति गुरोर्मनुष्यत्वज्ञानजन्यदोषकथनं कुला
र्णवे आज्ञाभङ्गोऽर्थहरणं गुरोरप्रियवर्णनं गुरुद्रोहमि
दं प्राहुर्यैः कुर्यात्तत्पातकी गुरुकोपात्तु नाशः स्याद्गु
रुद्रोहात्पातकं विस्मृत्य गुरुनिन्दायां गुर्वेनिष्ठात्महाप
दः जीवेदस्मिन्प्रविष्टो वा नरः पीतविषोपि वा रुष्टस्तु हन्त्यग
तो वापि नापराधकरो गुरोः इति गुर्वपराधादिदोषः रु
द्रजामले गुरोस्तु संत्यक्तानित्यक्तान गुर्वन्तरमाश्रयेत गुरु

तं·
सा·२·
११

नित्यानकर्त्तव्यानश्रोतव्याकदाचन इतिगुरुसन्ततिस्याग
निषेधः गुर्वीदिमाननप्रकारस्तत्रस्मरणरसोल्लासे श्री
रुंञ्चभावयेन्नित्यंसदाशिवमयंसदा गुरुगेहस्तत्वञ्चचार्व
ङ्गि·गणेशसदृशंसदा गुरोस्नुषावरारोहेवानीलक्ष्मीरिव
प्रिये गुरोःकुलेमहेशानिभैरवाणांगणंयथा कुलागमे
षाकानन्दतरङ्गिण्याञ्च गुरुर्मौलिस्थश्चार्वङ्गि·पूजेत्सर्व
दागुरुं गुरोपत्नींतथादेविपूजयेद्विधिनामुना कुलार्ण
वतन्त्रे कन्याधृतातथाशक्तीनामूलेनवसमाहृता सकृत्का
मगताचापिपञ्चधागुरुबोधितः अलज्याःपूजनीयाश्च
गम्याश्चगुरुबोधितः वृहन्नीलतन्त्रे गुरुपत्नीचयुवती
नसेवाश्रितपादयोः पुनर्विंशतिवर्षेणगुणदोषोविजा
नता अतएवमहेशानिनकुर्य्यात्पादसेवनं कुलागमे
गुरुवद्गुरुपुत्रेषुगुरुवत्तत्सुतादिषु पूजयेत्परमभ
क्त्याऽमुनाविधिनाप्रिये पूजाक्रमलतन्त्रेच गुरोरभा
वेचार्वङ्गि·गुरुपत्नींप्रपूजयेत् तदभावेचचार्वङ्गि·गुरुपु
त्रंसमर्चयेत् तदभावेवरारोहेगुरुकन्याञ्चपूजयेत्
तदभावेचचार्वङ्गि·गुरुस्नुषांप्रपूजयेत् एषामभावेचा
र्वङ्गि·गुरुगोत्रंप्रपूजयेत् तदभावेवरारोहेतथामाताम
हस्यच मातुलंमातुलानींवापूजयेद्विधिनामुना इति
गुरुकुलपूजाक्रमकथनं तथा निर्वीर्य्यत्वपितस्मिन्नुपो
वेशाकेनदृप्यनी तिवचनंकौलिकमन्त्रदीक्षापरं अत्र
हेतुःयोगिनीतन्त्रे शक्त्यादिविद्यामधिकृत्यदीक्षानिषेधा

न् यद्वा शाक्तेनाद्यादिविद्यायां मन्त्रसूक्तेन तथा प्रतिपाद्या
त् तथा च निजकुलतिलकाय ज्येष्ठपुत्राय दद्यादिमादि
श्रीक्रमेति मन्त्रविसृष्टदानमो ज्येष्ठपुत्राय धीमते महा
तीर्थे उपरागे सति सर्वत्र नादोषः तथा च विश्वमन्त्रमधिकृ
त्य पूजाकाले च वा वर्षि॰ आगच्छेच्छिष्यमन्दिरे गुरुर्वा गुरु
पत्नी वा पुत्रो वापि समागतः ज्येष्ठो वाप्यर्द्धनामध्ये शिष्यः
सर्वार्द्धनात्यजेत् तमेव पूजयेच्छिष्य इति शास्त्रस्य निर्ण
यः इति पूजाकाले गुर्वादावागते सति शिष्यकर्त्तव्य
मेवेव शिष्यस्य तद्दिने देवि कोटिसूर्य्यग्रहे समं चन्द्रग्र
हनकाले हि तद्दिने वरवर्णिनि गुरोर्दर्शनमात्रेण सर्व
पापैः प्रमुच्यते तत्क्षणाच्च चलापाङ्गि॰ दानं कुर्य्याद्विचक्ष
णः इति गुरुदर्शनदिनप्रशंसा गुरौ प्रीतिसमापन्ने देवता
प्रीतिमाप्नुयात् देवे च प्रीतिमापन्ने मन्त्रसिद्धिर्भवेद्ध्रुवं
इति गुरुप्रीतिफलं मुण्डमालातन्त्रे गुरुपूजां विना देवि
इष्टपूजां करोति यः मन्त्रस्य तस्य तेजांसि हरते भैरवः स्व
यं रुद्रयामले गुरुपूजां विना नाथ कोटिपुण्यं वृथा भवे
त् अतः सर्वजनेभ्योऽन्तं गुरुणा सिद्धिमाप्नुयात् राघवभ
ट्टधृते गुरुवक्त्रकाः क्रियाः सर्वा निष्फलाः स्युर्गतो ध्रुवं जपो हो
मार्च्चनविधिः कार्य्यो दीक्षाविनेयतः तथा प्रणम्य गुरुपा
दाब्जं ध्यात्वा च गुरुपादुकां ज्ञात्वा परमतत्त्वं वै योजयेत्कु
लेचेटिकां सकृत्तार्थः स धन्यश्च सकुलज्ञः स पण्डितः सभा
वतो महादेवि जायते नात्र संशयः गुरुगीतायां संसारसाग

तं॰
सा॰ र॰
१२

12

रसमुद्धरणैकमंत्रं ब्रह्मादिदेवमुनिसेवितसिद्धमंत्रं
दारिद्र्यदुःखभयशोकविनाशमंत्रं वंदे महाभयहरं गु
रोस्त्वमिर्गुरोर्भक्तिर्न्दृणां यदि जन्मभाग्यवशाद्देवि ये
षां संजायते क्वचित् तेषां मंत्रो भवेत्सिद्धिर्जीवन्मुक्ताश्च
ते नराः गुरोर्गेहे स्थितः शिष्यो यत्नं तस्यानुपाचरेत् तत्र
एव मतं यं प्रोक्तं पुण्यतीर्थशतानाधिकं इति गुरुगृहे नि॰
ष्यादिनं पुण्यकर्मफलं तत्रैव गुरोः पादरजो यत्नात्सुधी
मूर्द्धनि धारयेत् सर्वतीर्थकोटिजफलात्फलं दशगुणं ल
भेत् गुरोः पादोदकं यस्तु नित्यं पिबति भक्तितः सार्द्धत्रि
कोटितीर्थानां फलं स फलं स लभते ध्रुवं गुरुमाथनत
त्रे त्रिसंध्यं पिबते यस्तु गुरुपादोदकं सुधीः तस्य नास्ति
पुनर्जन्म संसारे मोहवर्त्मनि ब्रह्मा विष्णुश्च रुद्रश्च सर्वे
श्च पितृदेवताः मातुष्टस्तथा विप्रवद्यामि सकलं तव
ब्रह्मणा कथितं पूर्वं वशिष्ठाय महात्मने वशिष्ठोपि विश्व
त्राय मत्यैत्रेदमवात्स्वयं प्रसन्नहृदयः स्वच्छः पितामक
रुणानिधिः कुरुक्षेत्रे महातीर्थे सूर्यपर्वणि दत्तवान्
इत्यादि वैशंपायनसंहितायां शौनकं प्रति व्यासवचनं
योगिनीतंत्रे निर्वीर्यं जपितं मंत्रं तथा मामहस्य च स्वम
लं स्याद्यादितं संस्कारेणैव शुध्यति यत्नसाधीचैव सदा॰
चारो गुरुभक्तो जितेन्द्रियः सर्वमंत्रार्थतत्त्वज्ञः सुशीलः
पूजने रतः गुरुर्योग्यो भवेत्ताहि विधवापरिवर्जिता ॥
निर्गुणं नि श्रीगुरोः पादपद्मार्चितजले शुभे गुरोः पादोदक

यस्तन्निर्मल्यंपिबतिमानुषः धर्मार्थकाममोक्षाणामधिपो
जायतेचसः योगिनीतन्त्रे अपिध्याविगलस्मादपक्षालन
जलंयदि पिबेदसनभावेनयःसदेवीपुत्रंव्रजेत् गुप्तसा
धनतन्त्रे गुरोःपादोदकंयस्तुशिरसाधारयेन्नरः ससर्व
तीर्थजंपुण्यंलभतेनात्रसंशयः गुरुतन्त्रे त्रिसंध्यंपूजये
द्यस्तुगोरुपुष्पेजगद्गुरुं तस्यकिंमन्त्रपूजादिविधाने
नोमसजालकैः गुरोरन्नंमहादेवीयस्तुभक्षणमाचरेत् को
टिजन्मार्जितंपापंतत्क्षणान्नश्यति नस्नानंपादशौ
चञ्चनचैवाचमनञ्चरेत् प्राप्तिमात्रेणभोक्तव्यंनैवस्नानं
विचारयेत् नब्राह्मण्यंनकौलिसंनजानीतेविचारणे न
ज्ञातिस्तत्रवक्तूनांसभ्यानांतत्रविलनम् एकस्थानस्थितं
स्यान्नंततीर्थमण्डलीकृतं भोक्तव्यमोतदेवीभूदस्पृष्टं न
विनयेत् गुरोरन्नंसमुपाश्चाय यस्त्यान्मतिमान्नरः शिवोपि
तस्यदेवेनतुष्टोभवतिनान्यथा गुरोरुच्छिष्टकंदेवीभुक्ति
मुक्तिप्रदंभवेत् अवश्यंपवेस्सर्वैःशिष्यैभोक्तव्यंतद्दिनेदि
ने योगिनीतन्त्रे गुरूच्छिष्टंञ्चदेवेशितन्मतोच्छिष्टमेवच
भोजनीयंनसंदेहाविकारश्चदयोगतिः तदुच्छिष्टंमहा
देवीब्रह्मादीनांसुदुर्लभं गुरूच्छिष्टंतथाप्राप्तेमहाभूते
परात्परं एतेनगुरुपत्नीप्रसादंनभक्षणीयमित्यायातंतत
त्र गुरुपत्नीमहेशानिगुरुरेवनसंशय इत्यादिवचनात् गु
रुणागुरुपत्न्यावागुरुपुत्रेणवाप्रिये स्पृष्टान्नंमुष्टिमात्रंवा
योश्नीयाद्दुःखविंशति चिरजीवीजरारोगेविमुक्तोसोशिवो

तं·
सां·र·
१३
13

भवेत् गुरुतन्त्रे गुरोरुच्छिष्टकैर्यस्तु सर्वाङ्गं मत्तुलेपजे
त् वज्राणि तस्य गात्राणि न भिनत्ति कदाचन गुरोरुच्छिष्ट
मन्त्रं यो भक्षयेद्भक्तिभावतः अन्नपूर्णा जगद्धात्री तस्मै स
र्वं प्रयच्छति इति गुरोरुच्छिष्टभोजनफलं कदाचित्स्व
मेशानि यदि तत्र भ्रमो भवेत् न तस्य निष्कृतिर्दृष्टा कल्प
कोटिशतैरपि न भक्षयेद्यस्तु मोहाद्गुरोरुच्छिष्टकं प्रि
ये न तस्य कृत्स्ना भवेत्सर्वं हि विपत्तिश्च पदे पदे इति गुरोरुच्छि
ष्टपरित्यागदोषकथनं तत्रैव स्त्रीयादीनाशुभा प्रोक्ता मा
तृत्वाद्गुणाः स्मृताः इदं तु गुरोरुपासितमन्त्रपरम् न
था च भैरवीतन्त्रे स्त्रीयमन्त्रोपदेशात् न कुर्याद्गुरुरुचिन्त
ने मातुरित्युपासितेष्टगुणं अनुपासिते शुभफलदमि-
त्यर्थः सिद्धमन्त्रविषयत्वेति केचित् वस्तुतस्तु स्त्रीपदं वि
धवापरं योगिनीतन्त्रे एकवाक्यताबलात् विधवायाः स्वता
देशात्कन्यायाः पितुराज्ञया नाधिकारो यतो नार्यः सधवा
भर्तुराज्ञया पादुकावसनं छत्रं शायनं भूषणादिकं दृष्ट्वा
गुरोर्नमस्कुर्यादात्मभोगं न कारयेत् कुलार्णवे पादुका
मासनं छत्रं वाहनं वस्त्रचामरं दृष्ट्वा गुरोर्नमस्कुर्यादा
त्मकभोगाय कल्पयेत् पादप्रक्षालनं स्नानमभ्यङ्गं दन्त
धावनं मूत्रनिष्ठीवनं क्षौरं शयनं स्त्रीनिषेवणं वीरासन
पादुकासनं हास्यरोदनं केशमोचनमुष्णीषकञ्चु-
कालम्बनं तथा पादप्रक्षालनं वादं कलहं हरणं प्रिये
अङ्गभङ्गाङ्गुष्ठायादिकरास्फालविधूननं हूंकारं कूटमल्ला

दिशुङ्कसिस्मादिवाल्विके गुरुसिद्धमहासिद्धपीठक्षेत्राश्रये
भुव नाचरेदाचरेत्रोहाद्देवताशापमाप्नुयात् उपचारं वि
नातिष्ठेद्गुर्वग्रेनेच्छयाविशेत् इतिगुरुसमीपेमहापी
ठादौचपादप्रक्षालनादिनिषेधः योगिनीतन्त्रे सूत्रंयथ्य
प्यसंस्कारो गुरोराज्ञावशात्पिबेत् प्रायश्चित्तंनतत्रास्ति
वेदेपिस्थितमेवहि अपितत्रविरुद्धंवागुरुणाकथ्यते
यदि तत्सर्वमतंभवेद्देदेस्मिहारुद्रवचोयथा इतिगुरोरा
ज्ञयानिन्द्याचरणेदोषाभावकथनं निर्गतेयद्गुरोर्वक्त्रा
त्सर्वंशास्त्रंतदुच्यते गुरुकार्यस्वयंशक्तोनापरंप्रेरयेत्सि
ये रुद्रयामले वस्त्ररत्नपुरेरर्थैस्तैःसहितोपतिभक्ति
मान् गच्छंस्तिष्ठन्स्वपन्नाश्नञ्जपञ्जुह्वन्सम्पूजयेत् गु
रोराज्ञामेवकुर्वीत नतद्गुरोर्नान्तरात्मना अभिमानेनक
र्मव्याजातिविद्याधनादिभिः सर्वदासेवयेन्नित्यंशिष्यः
श्रीगुरुसन्निधौ इतिगुरोरग्रेमाननिषेधः तत्रैव सदाच
पादुकामन्त्रंजिह्वाग्रेयस्यवर्तते अनायासेनधर्मार्थका
ममोक्षंलभेन्नरः श्रीगुरोश्चरणाम्भोजंध्यायेयस्यसदैव
ते भुक्तयेमुक्तयेवीरनामासौभक्तलतोधिकः विद्याङ्गमा
सतंमन्त्रमुद्रांतत्रादिकंप्रभो सर्वंगुरुमुखाल्लब्धंसफलंना
न्यथाभवेत् कल्लोलेकोमलेवापिप्रासादेसंस्थितेतथा
रीचेकाष्ठेतथापृष्ठेगुरोरेकासनंत्यजेत् श्रीगुरोःपादुका
मन्त्रंमूलमन्त्रस्वपादुकां नाधिकारइतिस्वाश्रेणाधिकार
स्य स्त्रीणांगर्भवतीनाञ्चदीक्षायोनैवहर्षणं नकुर्यादश

तं
सो॰ रे॰
१४
14

मेनास्तिकत्वाचनरकीभवेत् स्वप्नल`` मंत्रोयदिसद्गुरुं
प्राप्नोतितदा ततएवतन्मंत्रंगृह्णीयात्कलशपूर्णिकलशे
गुरोःप्राणप्रतिष्ठांविधायवटपत्रेकुंकुमेनलिखितंमंत्रं
तत्कलशेप्रक्षिप्यउक्तोल्पमंत्रंगृह्णीयादितिपक्षः तथाहि
स्वप्नल- चकलशेगुरोःप्राणान्निवेशयेत् वटपत्रेकुं
कुमेनलिखित्वागृह्णीतेशुभे ततःसिद्धिमवाप्नोतिचान्य
थाविफलंभवेत् इदंतुगुरोरभावेतत्सत्वेतस्मादेवमंत्रं
गृह्णीयात् स्वप्नेतुनियमोनहीतिनारदवचनात् तत्र
सिद्धादिनियमोनास्ति शिष्यायमेवदेवेशप्रवदेयस्यक
स्यचित् यदात्महितेवसततंद्रव्येनैवप्रवंचयेत् गुरोर्ले
ख्यैकवर्णायत्नस्यतुष्यामिसब्रुतं भक्त्याविलानुसारेणशु
श्रुषियत्नकृते तयोरेवफलदेवतल्पमात्रदरिद्रयोः
सर्वस्वमपियोदद्याद्गुरुभक्तिविवर्जितः नरकेनदद्या
मोतिभक्तिरेवहिकारणं कुलार्णवेतु गुरुभक्त्याचशक्र
त्वंमङ्गत्वाम्रूकरोभवेत् गुरुभक्तिविनाकेवलेमपिभ
क्तावितितात्पर्यं गुरुभक्तिपरंनास्तिसर्वशास्त्रेषुनत्वतः
इतिगुरुभक्तिफलं यियंनेयिगवलेतेषांविकलकुलेपि
निवेष्टितं तेषांतोयपोतभक्तिंगुरुदेवमहेश्वरी जामले
गुरुस्त्रीपुत्रवंधुनांदोषंनैवप्रकाशयेत् ततयेत्रवतद्रू
पंदंतंनैवपरिस्पयेत् गुरुगीतायां गुरुणादर्शितेमार्गे
मनःशुद्धिंचकारयेत् गुरुणामसदसद्वापियदुक्तंतन्नल
ङ्घयेत् गुरोरग्रेनवक्तव्यमसत्यंचकदाचन ॥

पिच्छिलात्तत्त्वे पैत्रं गुरुकुलं यत्नात्त्यजेद्धर्ममोहितः
स याति नरकं घोरं यावच्चन्द्रार्कतारकं कुलार्णवे बला
दिलत्त्वपर्यन्ते यस्माद्गुरुसन्ततिः तस्मात्सर्वशिष्य
एकैकोलः पूज्यो महीतले इति निश्चितबुद्धिर्यः स भवेद
वयोः प्रियः श्रीगुरुः कुलशास्त्राणि पूजास्थानानि या
नि च भक्त्या श्रीपूर्वकं देवि प्रणम्य च प्रकीर्तयेत् गुरुंना
म्ना च भावेन जपकालादृते प्रिये श्रीनाथदेवस्वामीति
विवादे सम्पतते वदेत् अथ गुरुशुश्रूषा आत्मार्थमात्मस
ज्ञाद्यैः शुश्रूषा स्यात्त्रिविधा शुश्रूषया धियादेविशिष्यः
संतोषयेद्गुरुं पदे पदेऽश्वमेधस्य फलं प्राप्नोत्यसंशयं
केवलं गुरुशुश्रूषा तत्स्वरूपकारिणी प्रिये मद्भक्तिसहि
ताचेत्सा सर्वकामफलप्रदा हीयन्ते सर्वशापानि वर्द्धन्ते
पुण्यराशयः सिध्यन्ति सर्वकार्याणि गुरुशुश्रूषया प्रिये
यावदात्महितं वस्त्रं तावद्दीनमवञ्चयन् गुरुदेवार्थके
यत्नतस्पुम्नगाणते तावत्ततदीनमवञ्चयन् गु
रुदेवार्थकोयत्नतस्पुम्नगाणते, तथा विधावमाचा
र्यैः कृतेज्ञावालवचने मध्यदेशगुरुस्तत्रनादेकोऽङ्कुनस
म्भवाः अन्तर्वेदिप्रतिष्ठानाश्चावन्त्याश्च गुरुसत्तमाः मध्य
देशश्चार्य्यावर्तः गौडाः शाल्वान्द्वाश्चैव मगधाः केवला
स्तथा कोशलाश्च दशार्णाश्च गुरवः सप्तमध्यमाः अथदी
क्षाविचारादिनिर्णयः दीक्षां विना जपस्य डष्कत्वात्प्रथमं सा
निरूप्यते दिव्यज्ञानं यतो दद्यात्कुर्यात्पापस्य संक्षयं तस्मा

नं·
सो·रं·
१५
15

द्वीत्रेतिसाप्रोक्तामुनिभिस्तत्त्ववेदिभिः सर्वाश्रमेषुदी
क्षायाश्चावश्यकत्वे तथाच गुरुमित्रसुहृद्दासीदासाया
त्राद्यवमानेषु न निर्दिशेदसमयान्वेदशास्त्रागमादि
कान् तथा विविक्ते देशिकावासे शान्तचित्तोतिभक्तिमा
न् वाहने पादुकाच्छत्रचामरव्यजनादिकं ताम्बूलं वेशगु
ल्मप्रविशेच्च शनैः शनैः देवतारूपधारित्वाच्छिष्या
नुग्रहकारणात् करुणामयमूर्तित्वाद्देशिकः कथ्यते
प्रिये रिक्तहस्तस्तु नोपेयाद्राजानं दैवतं गुरुं फलपुष्पा
म्बरादीनि यथाशक्त्या समर्पयेत् मन्त्रग्रहणकाले नाडी
विचारस्यावश्यकत्वात्तदत्र निरूप्यते यथाच नरपति
जयचर्यायां स्वरोदये रुद्रयामले अश्विन्यादिलिखेच्च
क्रं सर्पाकारं त्रिनाडिकं तत्र वेधवशाज्ज्ञेयं विवाहादि
शुभाशुभं त्रिनाडिवेधनक्षत्रमश्विन्यार्द्रापुनर्वसूत्तरा ह
स्तज्येष्ठामूलवारुण्याः पूर्वभाद्रपदास्तथा आद्याः सौम्यपु
ष्ययोनिश्चित्रामित्रजलान्त्यपं कनिष्ठाचोत्तराभाद्रमध्ये
नाडीव्यवस्थिता कृत्तिकारोहिणीसर्पीमघास्वातिवि
शाखके उत्तराश्रवणापौष्णऋक्षोन्त्यनाडीव्यवस्थिता अश्वि
न्यादिनाडिवेधर्क्षषट्कं द्वियकं क्रमात् याम्यादितद्यान्तर्ये
च कृत्तिकादिद्विषट्कं एवं निरीक्षयेद्वेधं कस्मामस्त्रे
रोमन्त्रे पाण्यश्लीलामिमित्रेषु देशे ग्रामे पुरे राष्ट्रे एकनाडी
स्थितिष्वपि निपदिस्त्र्वैरकन्यायाः नदावेधं विजानीयाद्दग्र
वोदिषु तथैव च एकं यस्य जन्मर्क्षं तस्य जन्मर्क्षतो यथः

प्रश्नलग्नजन्मभे यस्यजन्मस्यनामर्त्ततो वदेत् द्वयोर्जन्मभयो
र्वेधेन कर्तव्यं कदाचन एकनाडीस्थितो चेत्स्याद्द्वन्द्वनाशा
यचाङ्गना एकनाडीस्थिता यत्र गुरुर्मन्त्रश्च देवता तत्रदे
यं कृज्जन्मलग्नं क्रमेण फलमादिशेत् प्रभुः पुण्याङ्गनामित्रं
देशो ग्रामः पुरं गृहं एकनाडीगता त्याज्या भयावेधवि
वर्जिता दीक्षाकार्ये मण्डपस्यावश्यकर्तव्यत्वेन तदर्थं
भूमिशोधनमाह कपिलपञ्चरात्रे तत्र भूमिं परीक्षेत तत्त्वा
लक्षणतत्त्वविशारदः स्फुटिता च सशल्या च वल्मीकारोहि
णी तथा दूरतः परिवर्ज्या भूः कर्तुरायुर्धनापहा स्फुटि
ता चेति चकारेण ऊषरापि वर्जनीया तत्रान्तरे स्फुटिता
मरणं कुर्यादूषरा धननाशिनी सशल्या क्लेशदा नित्यं वि
षमा शत्रुतो भयं इति वर्जनीयभूमिकथने ईशकोण
प्रवाला च कर्तुः श्रीदा सुनिश्चिते पूर्वप्लवा तु वृद्धिकरी य
न्दा तत्तरप्लवा विद्धं मरणं व्याधिं कुर्याद्दक्षिणप्लवाम
ही यमराजप्लवा भूमिर्निःस्वत्वभयदा रक्षःप्लवकरी
सा च भूमिर्याने ऋतप्लवा धनहानिकरी पृथ्वी कीर्ति
ता वरुणप्लवा वातप्लवा तथा भूमिर्निसमुद्वेगकारिणी
इति दिक्प्लवशुभाशुभकथनम् श्वेता तु ब्राह्मणी भू
मिरक्ता वै क्षत्रिया स्मृता वैश्या पीता समा विज्ञेया शूद्रा कृ
ष्णा प्रकीर्तिता ब्राह्मणी घृतगन्धा स्यात्क्षत्रिया रक्तगन्धिका
क्षीरगन्धा भवेद्वैश्या शूद्रा विड्गन्धिनी क्षितिः मधुरा ब्राह्म
णी भूमिः कषाया क्षत्रिया स्मृता वैश्या तिक्ता च विज्ञेया शू

तं॰
सारं
२९

ज्ञासांकटकामही ब्राह्मणीभूः कुशोपेनात्तत्रियासाच
वाकुला कुशकाशाकुलावेश्यापाम्भूद्रासर्वलक्षणाकुला यति
ब्राह्मण्यादिभूमिज्ञानकथनम् दीक्षामूलंजपंसर्वंदीक्षाम्
लंपरंतपः दीक्षामाश्रित्यनिवसेद्यत्रकुत्राश्रमेवसन् अ-
दीक्षिताये कुर्वंति जपपूजादिकाः क्रियाः नभवन्तिप्रियेतेषां
शीलायामबीजवत् देविदीक्षाविहीनस्यनसिद्धिर्न
चसद्गतिः तस्मात्सर्वप्रयत्नेनगुरुणादीक्षितोभवेत्
अदीक्षितोपिमरणेरौरवंनरकंव्रजेत् अदीक्षितस्यमर
णेपिशाचत्वंनमुञ्चति तस्माद्दीक्षाप्रजनेनेनसदाकुर्या
द्बनाद्विकात् तथाचनवरत्नेश्वरे सर्वासामपिदीक्षा
णांमुक्तिःफलमवाप्स्यते अविरोधाद्द्रवत्येवप्राप्तसङ्क्लेक
लभुक्तयः उपपातककलक्षाणिमहापातककोटयः अ
णाद्दहतिदेवेशिदीक्षाहिविधिनाकृता कल्पेदृष्टान्तम
त्रेवैयोगर्भातिनराधमः मन्वन्तरसहस्रेषुनिष्कृति
नैवजायते नादीक्षितस्यकार्यंस्यात्तपोभिर्नियमव्रतैः न
तीर्थगमनेनापिनचशारीरयन्त्रनैः मन्त्रमुक्ते अदीक्षि
तानांमर्त्यानांदोषंशृणुवरानने अन्नंविष्ठासमंतस्यज
लंमूत्रसमंस्मृतं तत्कृतेनस्यवाश्राद्धंसर्वंयातिस्वयो
गतिं अतः सद्गुरोराह्हिनादीक्षासर्वकर्माणिसाध
येत् अदसिनिषेधमाह तत्राप्युरे प्रणवाद्यंनदातव्यं
मन्त्रंशूद्रायसर्वथा आत्ममन्त्रंगुरोर्मन्त्रंमन्त्रंज्ञात्वाजप
संज्ञकम् ॥

स्वाहा प्रणवसंयुक्तं शूद्रे मन्त्रं ददद्द्विजः शूद्रो निरयमाप्नो
ति ब्राह्मणो यात्यधोगतिं स्मृतिरपि सावित्रीं प्रणवं यजुर्ल
क्ष्मीं स्त्रीशूद्रो यदि जानीयात् स मृतो अधोगच्छति सिता पीता
तथा रक्ता कृष्णवर्णसमन्विता स्निग्धोदका हृष्टा स्निग्धा भू
मिः सर्वसुखावहा शीतस्पर्शोष्णकाले च वह्निस्पर्शा हिमा
गमे वर्षासु वा भयस्पर्शा प्रशस्ता परिकीर्तिता हयशीर्ष
पञ्चरात्रे सुरभीनां रतिर्यत्र सवत्सानां हृष्टैः सह सुन्दरी
णां रतिर्यत्र पुरुषैः सह सत्तम काश्मीरचन्दनामोदा कर्पू
रागुरुगन्धिनी कमलोत्पलगन्धा च जातिचम्पकगन्धि
नी पाटलामल्लिकागन्धा नागकेशरगन्धिनी दधितीरा
ज्यगन्धा सुरामदिरा सर्वगन्धिनी स्वर्गाद्विप्राहि गन्धाढ्या शु
भगन्धयुता च सा सर्वेषामेव वर्णानां भूमिः साधारणी मता
इति शुभभूमिकथनम् हयशीर्षपञ्चरात्रे ज्ञात्वा भूमिं
परीक्षेत पूर्वोदकप्लवनां शुभां अशङ्कुटां तथाच्छिद्रां कु
तैलाय परिप्लुतां संपूर्णमाणैर्वा तेन न तथाधिकमदंशु
भां कुसुमप्रकरं स्लक्ष्णं तस्यां तत्र यातिम्लच्छति न निर्वा
ति तथा दीपः शीघ्रं प्रमुञ्चन्न पुष्पोष्णेन श्वेतारुणपीतकृष्णा
विप्रादीनां विशिष्यते त्याज्या भूमिः क्षारगन्धा पूतिगन्धा च
या भवेत् मधुरा च कषाया च अम्ला च कटुका च या कुशैः श
रैस्तथा काशैर्दूर्वाभिर्या च संभृता प्रायो गम्यारे विनतिमा
त्र विल्वांश्च निर्माय विवरान्भुवि निक्षिपेत्तां मदेनस्मिन्नास
शिष्टास्युः शोभनम् समासमध्यमे विधानानाशुपमसुच्यते

तं॰
सा॰ र॰
17

परीक्ष्यैवं प्रयत्नेन तत्रत्या भूमिकनीयसी शूद्राणां तु षके धा ह्यि
हीनेह कन्याथ भूतले खेल्लभाने यदा कुर्ण्णधाधाणः प्राप्यते
भुवि तदा पश्चात्यं वैचाष्टिके शाङ्का भेर्धनत्त्रयः तस्मना ग
त्रिमधे प्रोक्तेन तैः प्रोक्तादरिद्रता इति तुष्टफलकथनं ॥
गोमृङ्गम्पीनमण्डूकः शाङ्खेः शक्तिस्यच्छपः शालूकस्य
शस्ताः सर्वेचामी रत्नजातयः दीक्षामण्डपस्थाने शल्योद्धा
रणमावश्यकमतस्तदभिधीयते स्वरोदयष्टनवस्त्वा
मले श्रहिचक्रं प्रवक्ष्यामि यथा सर्वज्ञभाषितं इष्टशल्य
तथा म्यसयेन ज्ञानन्ति साधकाः निधिर्निवर्तनेकस्थः
संश्रान्तो यत्र भूतले विशेषमाह वाराही घे गोपालसमत
दैयोमहेशस्य च पादजे तमन्यामस्यापि सूर्यस्य गणेशस्य
मन्त्रस्तथा पद्मधारी तत्राधिकारी स्यादन्यथा पापभाग्भवेत्
तत्राप्यनुकूले मंत्रं दीक्षयेत् मननात्त्रायते यस्मात्तस्मान्म
न्त्रः प्रकीर्त्तितः तथा च सताराशिकोष्ठानामनुकूलान्
भजेन्मनून् सिद्धसारस्वते तत्र च नृसिंहार्कवराहाणां प्र
साद प्रणवस्य च सपिण्डाक्षरमंत्राणां सिद्धादीन्नैव शोध
येत् वाराहीतन्त्रे नाराचक्रं राशिचक्रं नामचक्रं तथैव च
तत्र चेत्स गुणो मंत्रो नान्यचक्रं विचिन्तयेत् तत्र चक्रमिदं स्था
प्यस्थाप्यस्थानहारमुपस्थितं ऊर्ध्वरेखाष्टकेलेख्यं तिर्यक्प
ञ्चतथैव च श्रहिचक्रं भवत्येवमष्टाविंशतिकोष्ठकं तत्रपोस्था
प्रियामध्ये संक्रान्तिकामच भाग्यपं उत्तराफाल्गुणीलेख्यं पूर्वेपङ्
क्त्याभमसमके श्रहिबध्नाजपादर्क्षे तान्भवत्स सर्पभं पुष्यहस्तम
मालेख्यं द्वितीयापङ्क्तिक्रमात्स्थितो प्रतिजिद्धिस्वात्र्यन्तं सौम्यो
इष्टतेवेस ॥

चित्रभञ्चतस्रतीयायांपङ्क्तौ पित्र्याम्समसृके विश्वर्क्षेतोय
भंमूलंज्येष्ठामैत्रंविशाखाभं स्वातीपङ्क्तौतुर्याचतुर्थ्यांन्यस्त्वा
चक्रेविलोकयेत् एवंसंजायतेचक्रंसंस्थानेपन्नगाकृति
द्वारशाखाभंमघायायाम्यौद्वारस्याकृतिकामता ग्रुप्रीशएवा
षाढादिक्षिकपञ्चचतुष्टयं योज्यंप्रोष्ठपदाद्येत्यो भीनिशा
षाणिभास्वतः एतेन ११।१२।१३।८।७।६।८।१९।१०।२०।११।२१।२२।२३।
२४। इतिचन्द्रस्य।।४।५।।११।१२।१३।।४।।५।।१६।।७।।८।।१९।।२१।।२४।
२६। इतिसूर्यस्य उदयादिगतानाड्योभयाः षष्ट्यामशोध
के दिनेन्यूनमुक्तयुक्तोसौभवेत्तत्कालचन्द्रमाः चन्द्रवत्साध
येत्सूर्यमस्तसंस्थेवेष्टकालिकं पश्चाद्विलोकयेत्सौचसस्वर्क्षे
वाम्पतःस्थितौ चन्द्रक्रूरसेघदार्केन्द्रूतदासेनिपतंनिधिः
भानुक्रूरस्थितौतौतत्तदाशल्यंविनिर्दिशेत् स्वस्वभेद्वि
तयेस्थेतेयंनास्तिकिञ्चिद्विपर्यये स्थितंनलभ्यतेद्रव्यंचन्द्रे
क्रूरग्रहान्विते पृष्टेचन्द्रेभवत्पृष्टःलीणचन्द्रेलपकोनिधिः
ग्रहदृष्टिवशात्सोपिविज्ञेयोनवधाबुधैः हेमताम्रञ्चता
रारत्नकांस्यायसत्रपु नागंचन्द्रेविनीनीयाद्भास्करा
दिग्रहेस्थिते मिश्रमिश्रंभवेद्द्रव्यंसूक्ष्मंदृष्टिविवर्जिते स
र्वग्रहेस्थितेचन्द्रेविज्ञेयोसौमहानिधिः हेमताररत्नताम्रा
रणाषाणिमरमयायसं सूर्यादिग्रहगेचन्द्रेद्रव्यभाण्डंप्र
जायते शुभहेत्रगतेचन्द्रेद्रव्यलाभोनसंशयः इतितप्रथा
नतथावोढव्यं तथाच पनिमंत्रंनगरंहस्तिपादकुलञ्च
तथैवच इत्यादिनष्टादर्शनानन्तरंचक्रविचारस्यावश्यकता

नेः
सं॰ वे
१८

18

न् प्रथमं तन्निरूप्यते स्वमूलश्लोकेष्विपादन्ते मालामन्त्रे चक्र
न्तरे वैदिकेषु च सर्वेषु सिद्धादीन्नैव शोधयेत् शालामन्त्रे
स्तवाराहीये विंशत्यर्णाधिका मन्त्रा मालामन्त्राः प्रकीर्तिताः
नपुंसकस्य मन्त्रस्य सिद्धादीन्नैव शोधयेत् हंसस्याष्टाक्षरस्या
पि तथा पञ्चाक्षरस्य च एकद्व्याक्षरादिबीजस्य सिद्धादीन्नैव शो
धयेत् तथा एकाक्षरस्य मन्त्रस्य मालामन्त्रस्य पार्वति या
पक्षेत्रेन लाभः स्याज्जन्मान्तरकोटिभिर्बुधैः भूरुराश्यंशमा
नेन भूमाने कार्मिकैः करैः नीचैर्हित्वा परे नीचे जलस्थोसौ
भवेन्निधिः उत्सेधेद्रुहरां दृष्ट्वा नवांशकक्रमेण च परमो॰
चेपरेन क्षि॰ भितिस्थमस्तसंक्रमे चन्द्रांशभुक्तमानेन द्रव्य
संख्या विधीयते तस्मान्निजायते बुद्धिः षड्वर्गेषु बलक्रमा
त् अधिष्ठितं भवेद्द्रव्यं यत्र चन्द्रो ग्रहान्वितः तदधिष्ठायको
ज्ञेयो भास्करादिग्रहैः क्रमात् ग्रहाश्च पञ्चग्रहाश्चैव क्षेत्रपाल
श्च मातृकाः दीपशोभी घण्टो रुद्रा वसो नागाः क्रमात्ततः अ
ष्टहोमश्च कर्तव्यो मुखे नारायणो बलिः क्षेत्रपाले सुरामांसं
मातृकाणां महाबलिः दीपे प्रदीपदानं पूजा भीषणो भीषणा
र्चनं रुद्रे रुद्रजपो जप्यो वसौ चलादि शान्तिकं नागे नागग॰
णाः पूज्या गणनाथेन संयुताः लक्ष्मीधरादितत्त्वानि सर्व
कार्येषु पूजयेत् एवं कृते विधानेन तुः साध्याः साध्यते नि
धिः निधिप्राप्त्यानेरालोके पूज्यते सर्वदा बुधैः अथवा मह
कपिलपञ्चरात्रविधानेन शल्योद्धारः कार्यः सक्रमो यथा
प्रसादारम्भकाले च गर्भहोमोच विशेषतः शल्योद्धारस्य

कर्तव्या यदीच्छेत्कुम्भमात्मनः प्रसादारम्भकाले च यद
ङ्ग-स्पृशते शुभान् वास्तुदेहे दृष्टे तत्र शालेंदयाद्धि वत्त
णः कण्डूयति शिरः पुंसि शिरः शाल्यं समुद्धरेत् शल्य
तत्रास्ति विज्ञेयं खन्यमाने करत्रये अग्निमाहुस्वरोगाख्य
यनहानिं प्रजायते यत्नेनोत्पाटयेच्छल्यं यदीच्छेत्कु
म्भमात्मनः बाहौ कण्डूयमाने तु निर्दिशेल्लोहमङ्गु-ख
ले तलहृद्येनमानं तल्लक्षणं कथितं तव स्वामिनामर
णं विद्याद्धि देशागमने तथा यत्नेनोत्पाटयेच्छल्यं यदी
च्छेत्कुम्भमात्मनः उरौ कण्डूयमाने तु कोशपशाल्यं विनि
र्दिशेत् हस्तेकेन च समं निष्ठेल्लक्षणं कथितं तव वेदि
कस्य च मन्त्रस्य सिद्धादीन्नैव शोधयेत् पुंमन्त्राः फडं-
न्ताः स्त्रीद्विठान्ताश्च विद्या मताः नपुंसकानमोन्तास्तुरि
स्मृता मनवस्त्रिधा घतत्सूक्ष्मा महाविद्या महाशाहेन
नीयते मालिनी विजये अप्यवस्था महेद्यायामहाविद्या
महीतले दोषजालेरसंस्पृष्टास्ताः सर्वाहि फलैः सह का
ली नीला महादुर्गा त्वरिता छिन्नमस्तिका वाग्वादिनी चा
न्नपूर्णा तथा प्रत्यङ्गिरा पुनः कामाख्या वासिनी बाला मा
तङ्गी शैलवासिनी इत्याद्याः सकला देव्यः कलौ पूर्णफ
लप्रदाः सिद्धमन्त्रे तयानात्र युगसेवा परिश्रमः तथा
चैता महाविद्याः कलिदोषान्न बाधिताः अमन्ती च भवे
द्वार्यीयशोहानिः प्रजायते यत्नेनोत्पाटयेच्छल्यं यदी-
च्छेत्कुम्भमात्मनः हस्ते कण्डूयमाने तु कङ्काले च विनि

नं·
स्तारं·
१९

द्दिशेत् त्रिहस्तेन तस्मिन्निष्ठेनवन्द्यमानेनत्वान्यथा अग्नि
माहस्थरोगस्यपीडाचरणंभवेत् यत्नेनोत्पाटयेच्छल्यं
यदीच्छेत्कुभमात्मनः पृष्ठकण्डूयमानेनत्ववाङ्कुशल्यंवि
निर्दिशेत् हस्तैनैकेनसंतिष्ठेनात्रकार्याविचारणा॥
स्वामिनाशोभवेत्तत्रभार्य्यावाजायतेसती पादेकण्डूय
मानेनहस्तशल्यंविनिर्दिशेत् साङ्गहस्तेनसन्निष्ठेल्ल
क्षणंमादिनेनव श्वङ्कनाशोराजदण्डःप्रायस्हानिश्चजा
यते कृतोकण्डूयमानेनत्पाषाणंतत्रनिर्दिशेत् हस्तहि
नयमानेनलक्षणंमादिनेनव भुजङ्गदंशस्तत्रस्यात्तत
स्माच्छल्यंसमुद्धरेत् जानौकण्डूयमानेनभस्मतत्रविनि
र्दिशेत् हस्तद्वयेनसन्निष्ठेल्लक्षणंमादिनेनव अग्निदा
होमनस्तापःक्लेशडःरवभयादिच करोत्येवविधंकर्म
तस्मात्तेवसमुद्धरेत् ज्योतिषे मुनिश्रितामन्दिरभूमि
मादौनिधायतोयावधियत्नेनतस्यां कुर्य्याद्धिशल्यामथ
वान्तमार्णेवोनाथवाप्रश्नवशाद्धि धिज्ञः दूर्वाप्रवाला
ननपुष्पफलाणिःशुद्धिदैवविदंसमेत्य पृच्छेद्धिनीतोथ
वा क्रमात्पुष्पायगादेवफलानांब्राह्मणादितः क्रमाद्वि
त्यनेनब्राह्मणःपुष्पनामवृक्षविद्योनदीनांवेषपोदेवना
मसूद्रःफलनामकथयेदित्यायाते प्रणवोधरणीधा
रिणीकरोननतदनन्तरः भूत्येनमश्वरीयमन्त्रात्रिपि
धान्तकः मन्त्रेणानेनकठिनीमभिमन्त्र्यविभाजयेत् न
वधामदनतेत्रंतयापश्चाद्विलिखयेत् व क च त प ह

19

शा प या न वेत् प्रश्नात्तराणिजायन्तेप्रागगादि कोष्ठनव
केवर्णोस्तेशल्यमालिख्येन्नि प्रश्नेवकारःपुरतोनरा
स्थिब्रवीतिशल्यंमकरप्रदायि १ तोणीशा दणोरगाहे
तम्ब्रत्पुरंककारः खरशल्यमेत्री २ याम्यांच्चकारः
ख्लवगाहिवेशमप्रभोर्विनाशावहमाङशल्यं ३ रतोदि
शिम्बास्थिगहस्थितानांमहद्भयंवक्ति स्तनिश्चितंतः ए
याशिदिशपहिशिशोब्रवीतिमत्त्रप्रवासामहमारुशा
ल्यं ४ तथाचमुण्डमालातन्त्रे कालीतारामहाविद्याषो
डशीभुवनेश्वरी भैरवीछिन्नमस्ताचविद्याधूमावतीत
था बगलासिद्धविद्याचमातङ्गीकमलात्मिका एतादु
शमहाविद्याःसिद्धविद्याःप्रकीर्तिताः नात्रसिद्धाद्यपेक्षा
स्तिनक्षत्रादिविचारणा कालादिशोधनंनास्तिनारिमित्रा
दिदूषणे सिद्धविद्यातयानात्रयुगसेवापरिश्रमः नास्ति
किञ्चिन्महादेविदुःखसाध्यंकदाचन इत्यादिवचनाद
त्रविचारोनास्ति वस्तुतस्त्विदंप्रशंसापरं सर्वत्रविचा
रस्यावश्यकत्वेऽरर दृष्टवशात्कदाचिद्वैरिमन्त्रस्य
सोदोषप्राप्यातदोषस्यदुष्टत्वादितिसाम्प्रदायिकाः हो
वायुकोनेनररूपमास्थिनारिभ्रमिष्टत्वयकृद्धियन्ते
यन्नपदिशिशाकारःप्राहविप्रास्थि चिन्तयकृदथप
कारोवक्तिऽरत्नास्थिशम्भो नदिहकुलविनाशंगोय
नानाच्चहानिं वितरतिगृहनाथस्यापिगुप्तस्यदेवैः
योमध्यभागेभसितंकपालेकालायमज्ज्वाहकुलत्नया

मं॰
सां रं॰
२॰

य यत्नादपास्यान्यथुनाप्रमाणंसर्वत्रतथ्यंकथयामि
शाल्ये इन्द्रलोजलेशानेशाल्यंसाङ्ककरेकोटौ वह्नि
न्तककुबेरेशुष्कघमध्यवातयोः देवीशुरागेण शुक
घायः स्थितेशाल्येनगृहेदोषदंगृहेत् प्रासादेदोषदं
शाल्यंभवेद्यावज्जलान्तिके इतिशाल्योद्धारः पूर्वादिदि
ङ्॰ध्रुवेनमण्डपःकार्यःअन्यथादोषकृतोयथायद्य
वभट्टसूनवचने यदिक्रियामायपादहरंविपन्नोनिरयं
व्रजेत् भानोर्गमादिशोज्ञात्वाकुर्यात्कर्माणिदेशिकः
वामलेवेयमध्यतोयत्रसम्पद्ध्वज्ञायनेकिल तत्रशङ्कुंप्रति
छाप्यजानीयात् कुण्डादिकस्थिते अङ्कुप्रमाणेनश्रेणीतिथे
अर्केङ्गुलायप्रच्छायाकाष्ठिहाङ्गुलमूलिका शङ्कुसंज्ञा
भवेत्तस्यास्तच्छायांपरिकल्पयेत् तदग्रमादिक्परिमा
नेष्टाग्रवृत्तंयथाविधि समसमेभूतलेकृत्वावृत्तंभ्रमण
रूपतः तन्मध्यबिन्दौशङ्कुंन्यस्यापघेह्वादशाङ्कुलं अ
ग्रच्छायाग्रवशाद्वृत्ते पूर्वापरद्वये पूर्वापरौह्यतयोः
कृत्वाविद्धेतमभितल्लक्षणा समसमानपरिभ्रमात्कार्यं
वृत्तद्वयंपुनः तयोःसंश्लेषसंजातमध्यदलोत्तरेस्थि
ते सन्धिद्वयेतत्प्राक्पश्चिमेसूत्रमध्येचविन्यसेत् सू
त्रदक्षिणोत्तरंतेषामग्रैःप्रागादिकल्पयेत् क्रियासारेपि
कृत्वाभूमिंसमांतत्रवृत्तेहस्तमितेसमे द्वादशाङ्कुल
मानेनवंशाङ्कुरवादिरनिर्मिते अलाभेयज्ञकाष्ठस्यतत्र
संस्थापयेत्सुधीः तच्छायामंसूक्ष्मंदृष्ट्वात्रतन्मध्येमध्यमे

स्थिते तिर्यक्प्रसारयेत्सूत्रं मध्ये याम्योत्तरे स्थिते कोणाः
सूत्रस्यैव तावन्तः सूत्रप्रसारणात् एवमासां परिज्ञा
नं समाख्यातं यथास्फुटं अथ कुलाकुलचक्रं कुलाकु
लस्य भेदं हि वक्ष्यामि मन्त्रिणामिह

वायु	अग्नि	भू	जल	आकाश
अ आ	इ ई	उ ऊ	ऋ ॠ	ऌ ॡ
ए	ऐ	ओ	औ	अं
क	ख	ग	घ	ङ
च	छ	ज	झ	ञ
ट	ठ	ड	ढ	ण
त	थ	द	ध	न
प	फ	ब	भ	म
य	र	ल	व	श
ष	क्ष	ळ	स	ह

तथा निबन्धे वाय्व
ग्निभूजलाकाशाः
पञ्चाशल्लिपयः
क्रमात् पञ्चह्रस्वाः
पञ्चदीर्घा बिन्द्वन्ताः
सन्धिसम्भवाः का
द्याः पञ्चवर्गाः यव
लसहान्ताः प्रकी
र्तिताः अ आ ए क
च ट त प य ष मा
रुताः इ ई ऐ ख
छ ठ थ फ र क्ष आ
ग्नेयाः उ ऊ ओ ग ज ड द ब ल ळ पार्थिवाः ऋ ॠ औ घ झ
ढ ध भ व स वारुणाः ऌ ॡ अं ङ ञ ण न म श ह
शहान्ता नभसाः साधकस्यान्तरं पूर्वं मन्त्रस्यापि तदक्षरं
यद्येकभूतदैवत्यं जानीयात्तत्कुले हितं भौमस्य वारु
णं मित्रं आग्नेयस्यापि मारुतं मारुते पार्थिवानाञ्च आ
ग्नेयञ्चाम्भसो रिपुः पार्थिवानाञ्चेति चकारात् आग्ने
यं पार्थिवानां रिपुः नाभसं सर्वमित्रं स्याद्धि रुद्धं नैव शी

नै॰ सां॰ २॰ ११

21

लयेत् अथ च रुद्रयामले पार्थिवे वारुणे मैत्रे तैजसे श
ऋषीशिते ऐन्द्रवारुणयोः शत्रुर्मारुतः परिकीर्तितः इति
राघवभट्टधृतवचनात् जलमारुतयोः शत्रुता इति कु
लाकुलचक्रविचारः ॥ ज्ञात्वैवं मण्डपादीनि कुर्यात्स
म्यग्विचारतः महाकपिलपञ्चरात्रे विषुवे तु गते सू
र्ये शङ्कुमानं समाचरेत् खादिरं विन्यसेच्छङ्कुं द्वादशा
ङ्गुलविस्तृतं इति दिग्ज्ञानं अथ शङ्कुनिखननप्रका
रः निश्चलीकृत्य हस्तं च्यारहीनालौहमुद्गरैः अथपृथा
च समाहन्यात्वशालक्रमतो लघु हन्यमाने यदा शङ्कौ
हस्तान्निपतति मुद्गरः तदा नाशयितुः शोको जाय
ते तस्य रोगो महान् इति शङ्कुनिखननप्रकारः अथ शङ्कु
सूत्रकरणं मौञ्जकौशेयकार्पासं प्राणिवालजमेव वा
वल्कचर्मपरीणाहं सूत्रं शङ्कौ तु वेष्टयेत् वेष्ट्यमाने यदा
सूत्रं शङ्कुमूर्च्छनिलक्षणात् सूत्रस्य मरणं विद्यात्छि
न्ने वेष्टपछिनाशनं तत्रापि नारसिंहेन होमेनाशुभना
शनं शङ्कुसारभूमिः प्रोक्ता तस्याग्रे वितस्तकं समस
हस्तादिनौ सौत्रस्यापरे यत्समभूतले शङ्कुद्विगुणमाने
न तन्मध्ये हस्तमालिख्य पूर्वापरान्तयोश्छायायदात
मण्डलात्स्पृशां तद्विन्दुद्वयगं सूत्रं पूर्वापरदिशि च्छने
विन्दुद्वयान्तरभ्रान्तशफरद्वयपुच्छगं दक्षिणोत्तर
गं सूत्रं पूर्वापरदिशिच्छन्ने विन्दुद्वयान्तरभ्रान्तशफर
द्वयपुच्छगं दक्षिणोत्तरगं सूत्रमेवं सूत्रद्वयं समस्तं त

दग्राणपयान्तानि सूत्राणि च विनिक्षिपेत् सूत्राणि ।
स्थापयेत्स्मात्ततः प्रागुत्तरमुखो निशा हयशीर्षपञ्चरा
त्रे भूमिं तोयसमां कृत्वा दर्पणोदरसन्निभे द्वादशाङ्गु
लमानेन तत्र हृत्तन्त्वत्रामयेत् मध्येन निश्चलं शङ्कु
स्थाप्यच्छायां निरीक्षयेत् हत्तरेखो यावास्य स्याशङ्कु
च्छाया प्रकल्पिता प्रवेशनिर्गमेन स्या शङ्कुच्छायां नि
रूपयेत् शङ्कुच्छाया प्रकल्पिता प्रवेशनिर्गमेन स्या
शङ्कुच्छायां निरूपयेत् शङ्कुच्छायाग्रविन्दुभ्यां प्राक्
प्रतीच्यौ प्रसाधयेत् राज्ञी प्राचीसाधनम् यथाहुति
काश्रवणपुष्या विशाखास्याश्चिंदन्तरं पतत्स्वाच्यादिशो
रूपं युगमात्रोदिते पुरः त्रिकाण्डमण्डलेपि श्रवणस्यो
दये प्राचीकृत्त्विकायास्त्वथोदये विशाखास्पत्नेरेवद्दृश्
येयोरिति शङ्कुप्रकरणं अथ दीक्षादौ मण्डपप्रकरणं
अथ राशि
चक्रं तथा
व कल्पद्रु
मे रेखाद्व
यं पूर्वपरे
ण कुर्यात्
तन्मध्यतो
याम्यकुवे
रभेदात् ॥

ने॰
सां॰ रं॰
२२

पञ्चैकमीशानानिशाचरेन्द्रहुताशवाय्वोर्विलिखेत्तो
र्णान् वेदाग्निवह्निगुणलग्नवर्णान्तिसंख्यान् पञ्चेषु
बाणशरपञ्चचतुष्टयार्णान् मेषादितः प्रविलिखे
त्शकलांस्तु वर्णान् क्रमागतान्स्वविलिखेदथ शादि
वर्णान् शारदाद्या वालेगोरिशैशानेशामीशाभेनिश
शिषु क्रमेणाभेदिना वर्णाः क्रमायोषाद्यः स्मृताः ते
न अआइई मेषः उऊऋ वृषः ॠऌॡ मिथुन एऐ क
र्कटः ओऔ सिंहः अंअः शषसहळक्षाः कन्या कवर्गस्तु
ला चवर्गो वृश्चिकः टवर्गो धनुः तवर्गो मकरः पवर्गः
कुम्भः यवर्गो मीनः स्वराशौ नामनुकूलं मन्त्रं भजेत्
तथा च स्वनामराशिकोष्ठानामनुकूलान् भजेत् तथा
च स्वनामराशिकोष्ठानामनुकूलान् भजेत् मनूनीति
नारदवचनात् राशीनामुक्तत्वात्तेषामप्येकत्वमस्ति
बाधे स्वराशेर्मन्त्रराशेरन्तं गणनीयं विचक्षणैः यदा
तु स्वराशेरज्ञाने तदा साधकनामाद्यक्षरस्थाने
राशिं गृहीत्वा गणयेत् नारायणीये अज्ञाते राशिन
क्षत्रे नामाद्यक्षरदर्शनात् साध्यामन्त्रराशेरन्तं गणयेत्स्था
पकालयादिति रामार्चनचन्द्रिकायां तन्त्राच्च तन्त्रराजे
